No. १५६४

Title कारिकावली टीका सिद्धान्त मुक्तावली.

Author विश्वनाथ पञ्चानन

Extent १५ Age ८

Subject न्याय वैशेषिकं

कारिकावलीटीका सिद्धांतमुक्तावली

१५ प०

१५७४

१३२८

नूतनजलधररुचये गोपवधूटीदुकूलचौराय तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय

ॐ नमो गुरवे

मुक्तावलीमिति ... मयासंक्षिप्ताः प्रकरणोपायाः
प्रतिबन्धाः ...

ॐ श्रीगुरवे नमः। चूडामणीकृतविधुर्वलयीकृतवासुकिः। भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः। वि-
शदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥२॥ सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरं ॥३॥ विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निब-
ध्नाति नूतनेति ननु मङ्गलं विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न अविगीतशि-
ष्टाचारविषयत्वेन मङ्गलस्य सफलत्वसिद्धौ तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वात् समाप्तिरेव फलं कल्प्यते इ-
त्थं च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते यत्र सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यं प्रचुरस्यैवात्र बलवत्तरत्वं वि-
घ्ननिवारणे त्वबोध्य विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् न चैवं तत्र सिद्धौ वि-
घ्नविरहवताकृतस्य मङ्गलस्य निःफलत्वापत्तिरिति वाच्यं इष्टापत्तेः विघ्नशङ्कया तदाचरणात् तथैव शिष्टाचारात् न चैवं मङ्गलस्य निःफलत्वे तद्बोधकवेदा-
प्रामाण्यं सति विघ्ने तस्य सफलत्वेन वेदबोधितत्वात् अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निःफलत्वेपि न वेदाप्रामाण्यं मङ्गलं च विघ्नध्वंसविशेषकारणं विघ्नध्वंस-
सामान्ये प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् इत्थं च नास्तिकादिग्रन्थे जन्मा-
न्तरीयमेव विनायकस्तवपाठादिः केचित्तु विघ्नात्यन्ताभाव एव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् इत्थं च नास्तिकादिग्रन्थे तु जन्मा
न्तरीयमङ्गलजन्यविघ्नध्वंसः स्वतः सिद्धविघ्नात्यन्ताभावो वा हेतुरिति न व्यभिचार इत्याहुः। संसारेति संसार एव महीरुहो वृक्षस्तस्य बीजाय एतेनेश्वरे जग-
त्कर्तृत्वमस्यादीनां सम्भवति अतस्तत्कर्तृत्वेनेश्वरसिद्धिः नच धर्माधर्मयोरेव कारणत्वं यावत्कर्मजन्यदेव एको विघ्नसमूहो
मालादर्शितं यथा घटादिकर्तृजन्यं तथापि तत्कर्तुरदिकमपि नच तत्कर्तृत्वमस्मदादीनां सम्भवति अतस्तत्कर्तृत्वेनेश्वरसिद्धिः नच धर्माधर्मयोरेव कार्यकारणभाव एवानुकूलतर्कः यावत्कर्मजन्यदेव एको विघ्नसमूहो
त्वसाधकेन सत्प्रतिपक्षस्तिवाच्यं अप्रयोजकत्वात् ममतु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलतर्कः। द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकं समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥२॥
न सप्तत्वं त्वादि द्रव्यगोमात्रत्वपतुसध्येयाः द्रव्यं गुणेति सूत्र द्रव्यगुणकर्मसामान्यसविशेषक समवाय तथाभाव पदार्थाः सप्त कीर्तिताः प्रतिपादिताः
अस्मासामायमावत्वप्रसादेवेष्टभावत्वे प्राप्ते तेन भावत्वेन षण्णामुपन्यासो न कृतः एते च पदार्था वैशेषिकप्रसिद्धाः नैयायिकानामप्यविरुद्धाः प्रतिपादितं
सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः एते च पदार्था वैशेषिकनये प्रसिद्धाः नैयायिकानामप्यविरुद्धाः प्रतिपादितं
निरूपपदार्थत्वमाप्यकितं ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्था-
चैवमेवमाख्ये अनन्तरोपन्यानं मतोस्मद्पदार्थभिन्नतयालाद्दशपात्वा निरूपपदार्थत्वमाप्यकितं ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्था-
नामपि सत्त्वात् तथाहि मण्यादिसन्निधाने वह्निना दाहो न जन्यते तच्छून्ये तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्यादौ प्रसारणेन च
त्वात् तथाहि मण्यादिसन्निधाने वह्निना दाहो न जन्यते तच्छून्ये तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च
इति कल्प्यते एवं सादृश्यमप्यतिरिक्तपदार्थस्तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यमिति न वाच्यं षड्भावेऽपि तस्य सत्त्वात् सामान्येपि सत्त्वात् यथा गोत्वं नित्यं तथाश्वत्वमपि सादृश्यप्रतीतेः मा प्रत्याभावे सत्त्वेनास्ति
दिकल्प्यते एवं सादृश्यमप्यतिरिक्तपदार्थः तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यमिति न वाच्यं अभावेऽपि तस्य सत्त्वात् सामान्येपि सत्त्वात् यथा गोत्वं नित्यं तथाश्वत्वमिति सादृश्यप्रतीतेः अभावे सत्त्वेनास्ति इति
चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्याद्यभावादेरेव वा स्वातन्त्र्येण हेतुत्वकल्पने अनेनैव सामञ्जस्येऽनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात्
मानत्वादिति चेन्न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्याद्यभावादेरेव वा स्वातन्त्र्येण हेतुत्वकल्पने अनेनैव सामञ्जस्येऽनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभू-
यस्त्वात् न च उत्तेजके सति प्रतिबन्धकसद्भावेपि दाह इति वाच्यं उत्तेजकाभावविशिष्टमण्याभावस्य कारणत्वात् सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभू-
योधर्मवत्त्वं यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति। द्रव्याणि विभजते सूत्र क्षित्यप्तेजो मरुद्व्योम कालदिग्देहिनो मनः।
द्रव्याणि क्षित्यप्तेजो मरुद्व्योमकाला दिग्देहिनो मनः एतानि नवद्रव्याणि इत्यर्थः ननु द्रव्यत्वजातौ किं प्रमाणं न हि प्रत्यक्षं तत्र प्रमाणं घटादौ रूपादिमद्भेदे
आपो जलानि मरुद्वायुः व्योमाकाशः देही आत्मा मनः ... एतानि नवद्रव्याणि इत्यर्थः ननु द्रव्यत्वजातौ किं प्रमाणं न हि प्रत्यक्षं तत्र प्रमाणं घटादौ
त्वत्वाग्रहादिति चेन्न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया वा द्रव्यत्वसिद्धेरिति ननु दशमं द्रव्यं तमः कथं नोक्तं
कृते दिशि ... नीलं रूपवत्त्वाच्च नजलादिकं नव्यत्वे चालोकनिरपेक्षचक्षुर्ग्राह्यत्वं च स्यात् तस्मात् तमः कारणमि-
कृतं ते दिग्भ्यस्तेन गृह्यते तस्य चलत्वमेव तमः तत्कर्मवत्त्वाच्च नच गन्धशून्यत्वात् न पृथिवी नीलरूपवत्त्वाच्च न जलादिकं नव्यत्वे चालोकनिरपेक्षचक्षुर्ग्राह्यत्वं च स्यात् तस्मात् कारणमि-
तिचेन्न आवश्यकतेजोऽभावेनोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूपवत्ताप्रतीतिस्तु भ्रमरूपा कर्मवत्प्रतीतिरपि आलोकापसारणौपाधिकी भ्रान्तैव तमसोऽतिरिक्त-
त्वेऽनन्तावयवादिकल्पनागौरवं स्यात्। गुणान् विभजते सूत्र अथ गुणा रूपं रसो गन्धस्ततः परं स्पर्शः संख्या परिमितिः
पृथक्त्वं च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकं द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च एते गुणाश्चतुर्विंशतिः सा-
पृथक्त्वं च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकं द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ... उत्क्षेपणमिति उत्क्षेपणं ततोऽपक्षेपणं
त्वाकाश ... कणादेन कण्ठतः एव नवदर्शिताः तत्र गुणत्वादिजातिसिद्धिरग्रे वक्ष्यते कर्माणि विभजते सूत्र उत्क्षेपणमिति उत्क्षेपणं ततोऽपक्षेपणं
माकुञ्चनं तथा प्रसारणं च गमनं कर्माण्येतानि पञ्च च कर्मत्वादिजातिस्तु प्रत्यक्षसिद्धा उत्क्षेपणत्वादिकमपि ननु भ्रमणादिकमपि ष्टपञ्चकर्माधिकतया कुतो नोक्तं

भ्रमणं (?) ...

कवन: १७ ... ८



मुक्तावलीप्रकाशिनी ...

कारणं

अप्यतिरिक्त
... नार्याद्यं ... दृष्टि
... नवाहि ... द्वित्वसंख्यादिकं सकं
... कार्यत्वात् ॥२॥ पदार्थाः सप्त मतो
चिन्ता शक्ति
नदीनाम ॥ भव
शक्ति सादृश्ये द्रव्यान्तरत्वं नमा
... ववतीसप्तपदार्थाभिन्नत्वात्
क्षितिः पृथ्वी तेजो वह्निः
कालः समयः दिग् दिशः
वयवा

अनुगतार्थमतमिति अमणं रेचनं स्पंदनोर्ध्वज्वलनमेवच तिर्यग्गमनमप्यत्र गमनादेवलभ्यते सामान्यं निरूपयति सामान्यमिति सामान्यंद्विविधं प्रोक्तं परंचा-
परमेवच नलक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वं अनेकसमवेतत्वं तु संयोगादीनामप्यस्ति अतउक्तं नित्यत्वे सतीति, नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्य-
स्ति तेनोक्तं अनेकेति नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावस्याप्यस्ति अतो वृत्तिसामान्यविरहे समवेतत्वमित्युक्तं एकमात्रवृत्तिर्नित्यो नजातिः तथाचोक्तं व्यक्तेरभेद
स्तुल्यत्वं संकरोथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः द्रव्यादीति मूलं द्रव्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते परभिन्ना तु याजातिः सैवापरतयोच्य-
ते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते परत्वमधिकदेशवृत्तित्वं अपरत्वमल्पदेशवृत्तित्वं सकलमात्रापेक्षयाऽधिकदेशवृत्तित्वात्सत्तायाः परत्वं तदपेक्षया चाप्या-
साजातीनामपरत्वं व्यापकत्वादिति व्यापकत्वात्पराणि व्याप्यत्वादपराणिच पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्परत्वं सत्तापेक्षया व्याप्यत्वा-
दल्पदेशवृत्तित्वाद् द्रव्यत्वस्यापरत्वं विशेषं निरूपयति अंत्य इति अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः अंतेऽवसाने वर्तत इत्यंत्यः यदपेक्षया विशेषोना-
स्तीत्यर्थः घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात्परस्परं भेदः परमाणोः परस्परं भेदको विशेष एव स तु स्वत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्ती-
तिभावः समवायं दर्शयति मूलं घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंधः समवायः प्रकीर्तितः घटादीनामिति अवयवावयविनोर्जा-
तिव्यक्त्योः गुणगुणिनोः क्रियाक्रियावतोर्विशेषनित्यद्रव्ययोश्च संबंधः समवायः समवायत्वं नित्यसंबंधत्वं तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणवि-
शेष्यसंबंधविषया विशिष्टबुद्धेः दंडीपुरुष इति विशिष्टबुद्धिवत् इत्यनुमानेन संयोगादिबाधात् समवायसिद्धिः नच स्वरूपसंबंधेन सिद्धसाधनं अर्थान्तरं वा
अनंतस्वरूपाणां संबंधत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः नच समवायस्यैकत्वे वायोरूपवत्ताबुद्धिप्रसंगः तत्र रूपसमवायसत्त्वेपि रूपाभावात्
नचैवमभावस्यापि वैशिष्ट्यं संबंधान्तरं सिद्ध्येदिति वाच्यं तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसंगात् घटाभावस्यात्र सत्त्वात् तस्यानित्य-
त्वात् अन्यादेशान्तरेपि घटाभावप्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात् ममतु घटापसारणानंतरमत्यापसारणकाले पातने घटाभावबुद्धिः वैशिष्ट्यस्यानित्यत्वेच
तत्तद्वैशिष्ट्यकल्पने तेनैव गौरवं एवंचतत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः अभावं विभजते अभावस्त्विति अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः
प्रागभावस्तथा ध्वंसोप्यत्यन्ताभाव एवच एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वं संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः
अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात् संसर्गाभावं विभजते प्रागभाव इति संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वं अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियो-
गिताकाभावत्वं विनाश्यभावत्वं प्रागभावत्वं जन्याभावत्वं ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यन्ताभावत्वं यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतंच तत्र घटकालस्य
संबंधाघटकत्वादत्यन्ताभावस्य नित्यत्वेपि घटकालेन घटात्यन्ताभावबुद्धिः तत्रोत्पादविनाशशाली चतुर्थोयमभाव इति केचित् अत्र ध्वंसप्रागभावाधिकरणेना-
त्यन्ताभाव इति प्राचांमतं श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति धीः प्रागभावध्वंसचावगाहते नत्वेतदत्यन्ताभावं नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालेऽ
वच्छेदेनात्यन्ताभावोवर्तत इत्याहुः नन्वत्यन्ताभावानामधिकरणात्मकत्वं वादितिचेन्न अनेनाधिकरणात्मकत्वापेक्षया तिरिक्तकल्पनायाः एव लघीयस्त्वात् एवंचाधारा-
धेयभावोप्युपपद्यते एवंच तत्तच्छब्दगंधरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदधिकरणानां तत्तदिंद्रियाग्राह्यत्वात्प्रत्यक्षत्वं नस्यात् एतेन ज्ञानविशेषकल्प-
विशेषान्यकल्पमभावस्येतिमतमुक्तं अप्रत्यक्षत्वापत्तेः इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुमुपक्रमते सप्तानामिति मूलं सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते
समानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म इति फलितोऽर्थः एवं विरुद्धो धर्मो येषां ते विरुद्धधर्माणस्तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितोऽर्थः ज्ञे-
यत्वं ज्ञानविषयता साच सर्वत्रैवास्ति ईश्वरज्ञानविषयतायाः केवलान्वयित्वात् एवमभिधेयत्वप्रमेयत्वादिकं बोध्यं द्रव्येति मूलं द्रव्यादयः पंचभावा अनेके
समवायिनः सत्तावंतस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियाः द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं यद्यप्यनेकत्वमभावेप्यस्ति तथाप्यनेकत्वे
सतिभावत्वं तथाचानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं फलितोऽर्थः तेन प्रत्येकं घटादौ नाव्याप्तिः समवायित्वं समवायसंबंधेन संबंधित्वं ननु समवाय-
त्वं सामान्यादावभावात् सत्तावंत इति द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः गुणादिरिति यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशू-
न्यत्वं गगनादावतिव्याप्तं तथापि गुणवद्वृत्तिधर्मत्वे कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः नहि घटत्वादिकं द्रव्यत्वं वा गुणवद्वृत्ति कर्मवद्वृत्ति वा
किंतु गुणत्वादिकं तथाकाशत्वं न पदार्थविभाजकोपाधिः सामान्येति सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः पारिमांडल्यभिन्नानां कारणत्वमुदाहृ-
तं सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः पारिमांडल्येति पारिमांडल्यमणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः अणुपरिमाणं न कस्यापि कारणं नहि



समवेतत्वं त्रिपदार्थविभाजकोपाधिमत्त्वं ... तेनानित्यद्रव्ये ... अप्रत्यक्षोपपत्तिः ... द्रव्यगुणकर्मणामेव सत्ता सिद्धिः

Margin notes: ज्ञानीय — वः — त्वात् — नित्यत्वाभावे — वच्च — ताच — धा — सत्वेन — एतज्ञाभावः — तितिरिक्तकल्प नायाभावात् — आकाश — दोष — नयोग्गिकोद्दत ५

स्तावयवारब्धद्व्यणुकपरिमाणारंभकं भवेत् न चैतत्संभवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वं द्व्यणुकजन्यस्याणुतरत्वप्रसंगात् एवं परममहत्परिमाणं चातीन्द्रियसामान्यविशेषा[illegible]मानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यं तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानसामान्येन प्रत्यासत्तिः ज्ञायमानलिंगेनानुमितिकरणमित्यपि ज्ञायते न तु कारणत्वं किमत आह अन्यथेति मूले अन्यथासिद्धिशून्यस्य नियतपूर्ववर्तिता कारणत्वं भवेत् तत्त्रैविध्यं परिकीर्तितं समवायिकारणत्वं ज्ञेयं यत्समवायिहेतुत्वं एवं न्यायनयेऽस्त्रीयमुक्तं निमित्तहेतुत्वं यत्समवेतं कार्यं भवति तत्समवायिकारणं तत् तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् तस्य कारणत्वस्य न वेति समवायिकारणप्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यात् एवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात् एवं ज्ञानादीनामिच्छाद्यसमवायिकारणत्वं स्यात् तथापि पटासमवायिकारणलक्षणे तन्तुसंयोगभिन्नत्वं देयं अन्यथा तुर्यामपि पटोत्पत्तिः स्यात् तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रति असमवायिकारणं भवत्येव एवं वेगादि कर्मभिन्नत्वं द[illegible]द्यसमवायिकारणं भवत्येव तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयं आत्मविशेषगुणानां तु क्वापि असमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव अत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं तत्र कार्येण घटेन कारणस्य कपालसंयोगस्य एकस्मिन्कपाले प्रत्यासत्तिरस्ति द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तत्र घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन्कपाले प्रत्यासत्तिरस्ति तथा च क्वचित्समवायसंबंधेन क्वचित्समवायि[illegible]समवायसंबंधेनेति फलितोऽर्थः इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नं असमवायिकारणमिति सामान्यतो लक्षणं पर्यवसन्नं आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः इदानीमन्यथासिद्धत्वं निरूपयति तदाह येनेत्यादि मूले येन सह पूर्वभावः कारणमादाय वा यस्य अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावः विज्ञातः जनकं प्रति पूर्ववर्तितां अपरिज्ञाय न यस्य गृह्यते अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः एते पंचान्यथासिद्धा दण्डत्वादिकमादिमं घटादौ दण्डरूपादि द्वितीयमपि दर्शितं तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पंचमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ येनेत्यादि यत्कार्यं प्रति कारणस्य पूर्ववर्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः यथा घटं प्रति दण्डत्वमिति द्वितीयमन्यथासिद्धमाह कारणमिति यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किंतु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दण्डरूपं तृतीयमाह अन्यं प्रतीति अन्यं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धं यथा घटादिकं प्रत्याकाशस्य आकाशस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात् आकाशत्वं तु शब्दसमवायिकारणत्वं अतश्च शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यं अतस्तदन्यथासिद्धं शब्दाश्रयत्वेनाकाशस्य कारणत्वे का अन्यथासिद्धिरिति चेत् पंचमीति आकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् कवत्वादिकं विशेषपदार्थो वेति चतुर्थमन्यथासिद्धमाह जनकं प्रतीति यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वं यथा कुलालपितुः घटं प्रति तस्य कुलालपितृत्वेन घटं प्रति जनकत्वे अन्यथासिद्धिः कुलालरूपेण जनकत्वे त्विष्टापत्तिः कुलालमात्रस्य घटं प्रति जनकत्वात् पंचममन्यथासिद्धमाह अतिरिक्तमिति अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः अत एव प्रत्यक्षे महत्त्वं कारणं अनेकद्रव्यवत्त्वमन्यथासिद्धं तत्र हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यवत्त्वमन्यथासिद्धं न च वैपरीत्ये किं विनिगमकमिति वाच्यं महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् रासभादिरिति यद्यपि क्वचित् घटं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तथापि घटजातीयं प्रसिद्धकारणाभावे दण्डादिभिरेव तदुत्पत्तेः रासभस्य अन्यथासिद्धत्वमिति भावः एतेष्विति एतेषु पंचसु अन्यथासिद्धेषु मध्ये पंचमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वात् तथाहि दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दण्डत्वादिकमन्यथासिद्धं न च वैपरीत्ये किं विनिगमकमिति वाच्यं दण्डत्वस्य कारणे दण्डघटितपरंपरायाः संबंधत्वे गौरवात् एवमन्येषामप्यनेन चरितार्थत्वं भवति [illegible] समवायिकारणत्वं तु द्रव्यस्यैवेति विज्ञेयं गुणकर्ममात्रवृत्तित्वं यत्समवायिहेतुत्वं असमवायिकारणत्वं गुणकर्मभिन्नानां [illegible] धर्मा न हि गुणकर्मणोः साधर्म्यमित्यत्रापि नान्वयं अथवा समवायिकारणवृत्तिसत्ताजातिभिन्ना सती तदर्थः तेन सत्तादीनामसमवायिकारणत्वविरहेऽपि नाव्याप्तिः अन्यत्रेति अन्यत्र नित्यद्रव्येभ्यः आश्रितत्वमिहोच्यते नित्यद्रव्याणि परमाण्वाकाशादीनि विहाय आश्रितत्वं साधर्म्यमित्यर्थः आश्रितत्वं तु समवायादिसंबंधेन वृत्तित्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमुपक्रमते क्षित्यादीनामिति क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता क्षितिर्जलं त

कालिकविशेषणतान्यसंबन्धेन वृत्तित्व विशे... नित्यपरमार्थः

दृष्टे तेषामेव [illegible]
यत्र दृष्टत्वाभावात् पूर्ववत् [illegible]

अपर
समवेत

यातेजः पवनो मन एव च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी कालखात्मदिशां सर्वगतत्वं परमं महत् क्षितिर्जलमिति पृथिव्यप्तेजोवायुमनसां परत्व
मपरत्वं मूर्तत्वं कर्मवत्त्वं वेगवत्त्वं च साधर्म्यं न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य
विवक्षितत्वात् मूर्तत्वमपकृष्टपरिमाणवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं बोध्यं कालेति कालाकाशात्म
दिशां सर्वगतत्वं सर्वमूर्तसंयोगित्वं परममहत्त्वं च परममहत्त्वं जातिविशेषः अपकर्षानाश्रयपरिमाणत्वं वा क्षित्यादीति क्षित्यादिपंचभूतानि चत्वारि
स्पर्शवन्ति हि पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च बहिरिंद्रियग्राह्यविशेषगुणवत्त्वं अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं तेन ज्ञानो घट इति
प्रत्यक्षे ज्ञानस्योपनीतभानविषयत्वात् तद्वति आत्मनि नातिव्याप्तिः न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्यापि योग्यत्वात् महत्त्वा
दिलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षं अथवा आत्मावृत्तिविशेषगुणवत्त्वं भूतत्वं वक्तव्यं चत्वारीति पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वं द्रव्यारंभ इति द्रव्या
रंभश्चतुर्षु स्यादथाकाशशरीरिणां अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वं न च द्रव्यारंभके घटादावव्याप्तिः॥
द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आकाशशरीरिणामिति आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं आकाश
स्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदा अन्यावच्छेदेन तदभावस्यापि सत्त्वात् क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रति
योगित्वं योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः एवं ज्ञानादीनामपि ज्ञानादिकं हि आत्मनि शरीरावच्छेदेनो
त्पद्यते घटावच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादिकमपि क्षणद्वयस्थायि इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः पृथिव्यादौ रूपादिविशेष
गुणोऽस्तीत्यव्याप्यवृत्तीत्युक्तं पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीति विशेषगुणेत्युक्तं न च रूपादीनामपि कदाचित् तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगु
णवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यं चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् अपेक्षाबुद्धिः क्षणत्रयमिति क्षणचतुष्टयं न किमपि ज्ञा
नादिकमिति इति रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्ततेऽतो न दोषः ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तं॥
यद्वा आकाशजीवात्मनोः साधर्म्यं तदा जन्येति न देयं द्वेषत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणे हि ज्ञानादीनां नाशा
भ्युपगमात् हि ज्ञानादीनामपि तथात्वात् न तावता विशेष इति त्रिक्षणवृत्तित्वं वाच्यं इच्छादिकमादाय आत्मनि लक्षणसमन्वयात् रूपेति रूपद्रवत्वप्रत्यक्ष
योगिनः स्युरथ त्रिकं पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं च तदर्थः न च चक्षुरादीनामर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मानमि
ति वाच्यं तत्रापि तेजस्त्वेन रूपानुमानात् एवं वायावानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यं न च घटादौ द्रुतसुवर्णादि
भिन्ने तेजसि च द्रवत्वमव्याप्तमिति वाच्यं द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घटजलतप्तघृतेषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रव
त्वस्य सत्त्वात् तत्र तत्र पृथिवीत्वादिसत्त्वात् तदादाय सर्वत्रान्वयः न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तं अतिव्याप्तं च रूपादौ गुणे इति वाच्यं चाक्षुषप्रत्यक्ष
विषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति गुरुणीति गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः गुरुत्ववत्त्वं रसवत्त्वं
पृथिवीजलयोरित्यर्थः न च घ्राणेन्द्रियादीनां वायवीयपार्थिवभागादीनां च रसादिमत्त्वे किं मानमिति वाच्यं तत्रापि पृथिवीत्वादिनानुमानात् द्वयोरिति पृथिवी
तेजसोरित्यर्थः न च नैमित्तिकद्रवत्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यं नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मन इति
आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रव
त्वं तेजसो गुणाः स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकं रूपरसस्नेहाः वारिण्येते चतुर्दश स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश बुद्ध्यादिषट्कं संख्या
दिपंचकं भावना तथा धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे संख्यादयः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे॥
परापरत्वे संख्यादिपंच वेगश्च मानसे तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥ पृथिव्यप्तेजोवाय्वाकाशात्मनो विशेषगुणवत्त्वमित्यर्थः यदुक्तमिति
हेयत्वादिकं विहायेति बोध्यं तत्र नवकस्यापि वैधर्म्यं केवलान्वयित्वात्॥

वायोर्नवैकादश तेजसो गुणाः जलक्षितिप्राणभृतां चतुर्दश [illegible] मनसस्तथैव च

नेत्यसंख्योदयः पंचविंशाकाशे साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति गंधवतीति गंधसमवायिकारणमित्यर्थः यद्यपि गंधवत्त्व
मात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं तथाहि पृथिवीत्वं हि गंधसमवायिकारणतावच्छेदकतया सिद्ध्यति अन्य
था गंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः नच पाषाणादौ गंधाभावाद्गंधवत्त्वमव्याप्तमिति वाच्यं तत्रापि गंधसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्य
ते कथमन्यथा तद्भस्मनि गंध उपलभ्यते भस्मीभूतपाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वसिद्ध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपा
देयमिति व्याप्तेः दृष्टं चैतत्तंतुपटे महापटध्वंसजन्ये दुर्लभं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वं तथा च तस्यापि गंधवत्त्वे बा
धकाभावः नानारूपेति शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्त्तते ननु जलादौ तत्र शुक्लस्यैव सत्त्वात् पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन
नानारूपसंभवात् नच नानारूपं यत्र भौतस्तत्त्वेन तत्राव्याप्तिः रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपतो पावहृति द्रव्यत्वव्याप्यजातिमत्त्वस्य वाच्यत्वात् वैषा
विकमते पृथिवीपरमाणोरूपनाशस्य रूपांतरस्य च सत्त्वात् न्यायनये घटादावपि तस्य सत्त्वाल्लक्षणसमन्वयः षड्विध इति षड्विधस्तु रसस्तत्र गंधस्तु द्विविधो मतः
मधुराम्ललवणकटुकतिक्तकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव जले तु मधुर एव रसः अत्रापि षड्विधवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थो वाच्यः ॥
गंधस्त्विति द्विविध इति वस्तुस्थितिमात्रं ननु द्विविधगंधवत्त्वमिति लक्षणं द्विविधस्यैकत्राभावात् द्वैविध्यं च सौरभासौरभभेदेन ज्ञेयं स्पर्शइति स्पर्शस्तस्यास्तु
विजेयोऽनुष्णाशीतपाकजः तस्याः पृथिव्या अनुष्णाशीतस्पर्शवत्त्वे वायोरपि वर्त्तते इत्यत उक्तं पाकज इति इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं
[illegible]कं पाकजस्पर्शवत्त्वमात्रं लक्षणं अधिकं स्ववैयर्थ्यात् यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः नि
त्येति नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा, सा पृथिवी द्विविधा नित्याऽनित्या चेत्यर्थः अणुलक्षणा परमाणुलक्षणा पृथिवी नित्या तदन्या
परमाणुभिन्ना पृथिवी द्व्यणुकाद्यणुकादिरूपाऽनित्येत्यर्थः सेवानित्या पृथिवी अवयववती नन्ववयविनि किं मानं परमाणुपुंजैरेवोपपत्तेः नच परमाण
नामतींद्रियत्वात् घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यं एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वात् यथा एकस्य केशस्य दूरे अप्रत्यक्षत्वेपि तत्समूह
स्य प्रत्यक्षत्वं नच एकः स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यं एको महान्धान्यराशिरितिवदुपपत्तेः मैवं परमाणोरतींद्रियत्वेन तत्समूहस्यापि प्रत्य
क्षत्वायोगात् दूरस्थकेशस्तु नातींद्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात् न च तदानींतनपरमाणुपुंजस्योत्पन्नत्वात्प्रत्यक्षत्वेपि विरोध इति वाच्यं अदृश्य
रूपानुपादानत्वात् अन्यथा चक्षुरूपादि संततौ कदाचिद्दृश्यत्वप्रसंगात् नचातिनम्रतैलादौ कथं महद्दृश्यद्दहनसंततेर्दृश्यद्दहनोपपत्तिरिति वाच्यं तत्रतद्
दृश्यानुपादानत्वात् अन्यथा वह्नि दृश्यत्वप्रसंगात् नचाद्दृश्येन द्व्यणुकेनव...पातिदृश्यदहनो वा ... दृश्यत्वत्रसरेणोरुत्पत्तिरिति वाच्यं यतो नवृद्ध्यं दृश्यत्वं महद्दृश्यत्वं वा
तःपातिदृश्यदहनोवर्वेः स्थूलदेहनोत्पत्तेरभ्युपगमात् नचाद्दृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यं यतो न वयं दृश्यत्वं महद्दृश्यत्वं वा
कस्यचित्स्वभावादाचक्ष्महे परंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशाद्दृश्यत्वं तदभावे वाऽदृश्यत्वं त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं नतु द्व्यणुकादेस्तदभा
वात् नहि त्वन्मतेपीदं संभवति परमाणोर्महत्त्वाभावात् इत्थं चावयविनि सिद्धे तेषामुत्पत्तिविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वं तेषां चावयवावयवधारया
अनंतत्वे मेरुसर्षपयोरपि साम्यप्रसंगः अतः क्वचिद्विश्रामो वाच्यः यत्र विश्रामस्तस्यानित्यत्वे असमवेतकार्योत्पत्तिप्रसंगात्तस्य नित्यत्वं महत्परिमाण
तारतम्यस्यापि क्वचिद्विश्रांतत्वमस्तीति तस्य परमाणुत्वसिद्धिः नच त्रसरेणोरेव घटाः सावयवाः महदारंभकत्वात् कपालवदित्यनुमानेन तदवयवसिद्धेरिति
नचेदमप्रयोजकं अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यस्य प्रयोजकत्वात् नचैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यं अनवस्थाभयेन तदसिद्धेरिति साच त्रिविधे
ति साच त्रिधा भवेद्देह इंद्रियं विषयस्तथा योनिजादिर्भवेद्देहमिंद्रियं घ्राणलक्षणं साकार्यरूपा पृथिवी त्रिविधा शरीरेंद्रियविषयभेदादित्यर्थः
तत्र देहमुदाहरति योनिजादीति योनिजमयोनिजं चेत्यर्थः योनिजमपि द्विविधं जरायुजमंडजं च जरायुजं मानुष्यादीनां अंडजं सर्पादीनां अयोनिजं स्वेदजो
द्भिज्जादिकं स्वेदजाः कृमिदंशाद्याः उद्भिज्जास्तरुगुल्माद्याः नारकीणां शरीरमप्ययोनिजं नच मानुष्यादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यं गंधा
दिमत्त्वस्यैव प्रमाणत्वात् नचक्लेदोष्मादेरुपलंभादाप्यत्वादिकमपि स्यादिति वाच्यं तथा च सति जलत्वपृथिवीत्वादिना संकरप्रसंगात् नचतर्हि जलत्वा

इत्यगगनादौ विश्रांतत्वमिति तु परिमाणतारतम्यस्य
इदं च विश्रामो नीतिवाच्यं त्रसरेणोः सावयवाः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ
अप्रसरेणोर्त्तसे

दिकमेवास्तु न तु पार्थिवत्वमिति वाच्यं केदारादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् संपाद्यपलब्धेश्च पृथिवीत्वसिद्धेः तेन पार्थिवशरीरे जलादीनां निमित्तत्वमात्रमेवाध्या शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात् किंतु चेष्टाश्रयत्वं वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः न च हस्तादेः शरीरत्वे किं मानमिति वाच्यं आध्यात्मिकवायुसंबन्धस्य प्रमाणत्वात् तत्रैव किं मानमिति चेन्न भग्नक्षतसंरोहणादिना तदनुमानात् यदि हस्तादौ शरीरत्वव्यवहारो न भवति तदा त्वावयवित्वेन विशेषणीयं न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यं तादृशे प्रमाणाभावात् अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तथा नृसिंहत्वं वैजात्यादिजातिमादाय लक्षणसमन्वयः न च नृसिंहशरीरे कथं लक्षणसमन्वयः तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तित्वेन जातित्वाभावात् जलीयतैजसशरीरवृत्तितयादेवत्वस्यापि जातित्वाभावादिति वाच्यं कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् इन्द्रियमिति घ्राणेन्द्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथमिति चेदित्थं घ्राणेन्द्रियं पार्थिवं रूपादिमध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतादिवत् न च दृष्टान्ते स्वीयरूपाभिव्यञ्जकत्वादीनामसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकस्य तन्नदर्शितत्वात् न च नवशरावगन्धव्यञ्जकजलेनानैकान्तिकमिति वाच्यं तस्य सक्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टान्तत्वसंभवात् न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सति विशेषणत्वात् विषय इति विषयो घटादिस्तु ब्रह्माण्डान्त उदाहृतः भोगसाधनं विषयः सर्वस्यैव हि कार्यजातं अदृष्टादीनं यत्र कार्यं यददृष्टाधीनं तत्तदुपभोगे साक्षात्परंपरया वा जनयत्येव न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति तेन द्व्यणुकादिकं ब्रह्माण्डान्तं सर्वमेव विषयो भवति शरीरेन्द्रियविषयत्वेऽपि प्रकारान्तरेणान्वयोपन्यासः जलं निरूपयति वर्णः शुक्ल इति वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् तस्य नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावित्वनियमादिति चेन्न जन्यस्नेहजनकतावच्छेदिकाया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः शुक्लरूपमेव जलस्येति दर्शयितुं उक्तं वर्णः शुक्ल इति नन्वशुक्लरूपवत्त्वं लक्षणं अथवा नैमित्तिकद्रवत्ववद्वृत्तिशुक्लरूपवद्वृत्ति द्रवत्वसाक्षाद्व्याप्यजातिमत्त्वं अभास्वरशुक्लेतररूपसमानाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः रसस्पर्शाविति जलस्य मधुर एव रसः शीत एव स्पर्शः तिक्ताद्यवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वार्थः नन्वशुक्लरूपमेवेति कुतः कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् जले नीलरूपासंभवात् कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयोपाधिकी अत एव वियति विक्षेपे धवलिमोपलब्धिः अथ जले माधुर्ये किं मानं नहि शुक्तजलेऽपि कोऽपि रसस्तत्रानुभूयते न च नारिकेलजलादौ माधुर्यमुपलभ्यत इति वाच्यं तस्याश्रयोपाधिकत्वादन्यथा जम्बीररसवीरादावुपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् न च हरीतक्या एव जलीयसंयोगाद्रसान्तरोपलब्धिरिति वाच्यं कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाज्जम्बीराम्लादिकं जम्बीररसादौ त्वाश्रयोपाधिकी तत्प्रतीतिः एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वं जन्यजलत्वं वा बोध्यं घृतचन्दनादौ तु शैत्योपलब्धिः संदर्शनान्तरवृत्तिशीतनरसलिलस्य तेजःसंयोगे जले उष्णत्वप्रतीतिराश्रयोपाधिकी स्फुटैव तत्र पाकासंभवात् स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतं नित्यतादि प्रथमवत् किंतु देहमयोनिजं स्नेहस्त्वेतादावपि तदन्तर्गतजलस्यैव स्नेहजलस्यैव स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यं द्रवत्वं सांसिद्धिकमुदाहृतं सांसिद्धिकद्रवत्ववज्जातिविशेषः तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः तैलादौ जलस्यैव द्रवत्वं स्नेहप्रकर्षेण दहनानुकूल्यमिति वदति नित्यतादि प्रथमवत् पृथिवीवदित्यर्थः तथाहि जलमपि द्विविधं नित्यमनित्यं च परमाणुरूपं नित्यं द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतं च अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभेदात् किंतु पृथिवीतोऽयोनिजं विशेषस्तमाह देहमयोनिजं अयोनिजमेवेत्यर्थः जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धमेवेति इन्द्रियं रसनं सिन्धुहिमादिविषयो मतः इति मूलं इन्द्रियं रसनं जलीयमित्यर्थः तथाहि रसनं जलीयं गन्धाव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् रसनेन्द्रियसन्निकर्षव्यभिचारवारणाय द्रव्यत्वे न देयं विषयं दर्शयति सिन्धुहिमादिविषयो मतः सिन्धुः समुद्रः हिमं तुषारः आदिपदात्सरित्कासारकरकादिः सर्वो ग्राह्यः न च हिमकरकयोः कठिनत्वात्पार्थिवत्वं वाच्यं ऊष्मणा विलीनयोस्तयोर्जलत्वप्रतीत्या सिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायां काठिन्यप्रतीतेर्भ्रान्तत्वात् तेजो निरूपयति ॥ ॥ ॥

स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लं भास्वरं नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् इंद्रियं नयनं वह्निः स्वर्णादि विषयो मतः मूलं स्पर्श उष्णस्तेजस उष्णत्वस्पर्शनिष्ठो। जातिविशेषः प्रसिद्धः इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः तस्य परमाणुवृत्तित्वं जलस्येवानुसंधेयं न चोष्णस्पर्शवत्त्वं चंद्रकिरणादावव्याप्तमिति वाच्यं तत्राप्युष्णत्वसत्वात् किंतु तदंतःपातिजलस्पर्शेनाभिभवादग्रहः एवं स्वर्णकिरणादौ पार्थिवस्पर्शेनाभिभवात् चक्षुरादौ त्वनुद्भूतत्वाच्च न तदग्रहः स्याद्रूपं शुक्लं भासुरं वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवात् शुक्लत्वाग्रहः तद्रूपाग्रहेऽपि प्रभोऽपि चाक्षुषत्वं न स्यादिति चेन्न अस्मदीयरूपेणैव धर्मिणोऽपि ग्रहसंभवात् पावकस्यैव पित्तपीतिम्ना वह्नेस्तु शुक्लरूपमभिभूतं तदीयशुक्लत्वमभिभूतमित्यन्ये नैमित्तिकं द्रवत्वं तु सुवर्णादिरूपे तेजसि तत्संभवात् ननु नैमित्तिकद्रवत्वं दहनादावव्याप्तं घृतादावतिव्याप्तमिति चेन्न एवं च वृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य तदर्थत्वात् नित्यतादि पूर्ववत् जलस्येवेत्यर्थः तथाहि तेजो द्विविधं नित्यमनित्यं च नित्यं परमाणुरूपं तदन्यमनित्यं अवयवि च तत्त्रिधा शरीरेंद्रियविषयभेदात् तत्रार्थः शरीरमयोनिजमेव तच्च सूर्यलोकादौ प्रसिद्धं अत्र यो विशेषस्तमेवाह मूलं इंद्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः इंद्रियं नयनं चक्षुस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यंजकत्वादाद्यं परकीयेति यदादेः स्वीयरूपव्यंजकत्वव्यभिचारवारणाय द्वितीयं परकीयेति देयं अथवा मनोग्राह्यत्वासंभवादाद्यं परकीयेति न देयं चक्षुःसन्निकर्षवारणाय द्रव्यत्वं देयं विषयं दर्शयति वह्निः स्वर्णादिर्विषयो मतः ननु सुवर्णस्य तैजसत्वे किं मानमिति चेत् सुवर्णं तैजसं असति प्रतिबंधके अत्यंतानलसंयोगे सत्यपि अनुच्छिद्यमानद्रवत्वात् यन्नैवं तन्नैवं यथा पृथिवी न चाप्रयोजकं पृथिवीद्रवत्वस्य जलद्रवत्वस्य वाग्निसंयोगनाश्यत्वात् ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमसीतोदवत्तस्याद्रवत्वात् अपरे तु पीतिमाश्रयस्याग्निसंयोगेऽपि रूपापरावृत्तिदर्शनात् प्रतिबंधकं विजातीयद्रव्यं कल्प्यते तथाहि अग्निसंयोगे पीतिमगुरुत्वाश्रयत्वात् विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयोगः सिद्धः अत्यंतानलसंयोगेऽपि पूर्वरूपाविजातीयरूपानधिकरणत्वात् तप्तजलमध्यस्थपीतपटवत् तस्य पृथिवीजलभिन्नस्य तैजसत्वनियमात् वायुं निरूपयति मूलं अपाकजोऽनुष्णाशीतः स्पर्शस्तु पवने मतः तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिंगकः अपाकजोऽनुष्णाशीतस्पर्शस्तु वायोरेव मतः तिर्यग्गमनवानेष ज्ञेयः अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् अत उक्तमपाकज इति अपाकजस्पर्शस्य जलादावपि सत्त्वात् अत उक्तमनुष्णाशीत इति एतेन वायवीयो विजातीयस्पर्शो दर्शितः तज्जनकतावच्छेदकं वायुत्वमिति भावः एषो वायुः स्पर्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कंपेन च वायोरनुमानात् यथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्यते मूलं पूर्ववद्धापितानुक्तदेहव्यापित्वगिंद्रियं प्राणादिस्तु महावायुपर्यंतो विषयो मतः पूर्ववन्नित्यतायुक्तं वायुर्हि द्विविधः नित्योऽनित्यश्च परमाणुरूपो नित्यः अनित्यस्तदन्यः समवेतश्च सोऽपि त्रिविधः शरीरेंद्रियविषयभेदात् तत्र शरीरमयोनिजं पिशाचादीनां परंतु जलीयतैजसादिशरीराणां पार्थिवभागोपष्टंभादुपभोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमिति अत्र यो विशेषस्तमाह देहव्यापित्वगिंद्रियं शरीरव्यापकं स्पर्शग्राहकमिंद्रियं त्वक् तच्च वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात् अंगसंगिसलिलशैत्याभिव्यंजकव्यजनपवनवत् विषयं दर्शयति प्राणादिस्तु महावायुपर्यंतो विषयो मतः प्राणादिस्तु यद्यप्यनित्यो वायुस्त्रिविधः प्राणादिरित्युक्तमाकरे तथापि संक्षेपादेवं त्रैविध्यमुक्तं प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमादिक्रियावशाच्च नानाक्रियाः लभते महावायुपर्यंतो विषयो मतः आकाशं निरूपयति मूलं आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः इंद्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः आकाशकालदिशामेकैकव्यक्तिकत्वादाकाशादिकं न जातिः किंतु शब्दाश्रयत्वं वैशेषिक इति विशेषणानतरव्यवच्छेदाय एतेन प्रमाणं दर्शितं तथाहि शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिंद्रियग्राह्य[illegible]जातिमत्त्वात् स्पर्शवत् शब्दः समवेतः गुणत्वादित्यनुमानेन शब्दस्य समवेतत्वसिद्धेः शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पाकजरूपादौ व्यभिचारवारणाय सत्यंतं पटरूपादौ व्यभिचारवारणायाकारणगुणपूर्वकेति। न दिक्कालमनसां गुणः विशेषगुणत्वात् रूपवत् नात्मविशेषगुणः बहिरिंद्रिययोग्यत्वात् रूपवत् इत्थं शब्दादिकरणं नवमद्रव्यगगनं नामकं सिद्ध्यति

नन्ववयवेषूत्पन्नस्पर्शक्रमेणैवावयविकारणगुणपूर्वकः स्पर्श उत्पद्यतामिति वाच्यं अयावद्द्रव्यभावित्वेन वायोर्विशेषगुणाभावात् न च शरीरस्य विषयस्याभावात् इंद्रियं दर्शयति इंद्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः इंद्रियं तु भवेच्छ्रोत्रं नन्वाकाशो लाघवादेव सिद्धः श्रोत्रं तु पुरुषभेदाद्भिन्नं कथमाकाशः स्यात्तदाह एकः सन्नप्युपाधितः आकाशः एकः सन्नपि उपाधेः कर्णशष्कुल्या भेदात् भिन्नं श्रोत्रात्मकं भवतीत्यर्थः कालं निरूपयति मूले जन्यानां जनकः कालो जगतामाश्रयो मतः परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः जन्यानां जनकः कालः तत्र प्रमाणं दर्शयति जगतामाश्रयो मतः इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पंदादिकं विषयीकरोति तदा सूर्यपरिस्पंदादिना घटादेः संबंधो वाच्यः स च संयोगादिर्न संभवति काल एव संबंधघटकः कल्प्यते इत्थं च तस्याश्रयत्वे सम्यक् प्रमाणांतरं दर्शयति परत्वापरत्वधीहेतुः परत्वादिबुद्धेरसाधारणं निमित्तं काल इत्यर्थः परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयः लाघवादतिरिक्तः कल्प्यत इति भावः नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यात्तत्राह क्षणादिः स्यादुपाधितः क्षणादिव्यवहारविषय इत्यर्थः उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म पूर्वसंयोगावच्छिन्नं कर्म वा न चोत्तरसंयोगानंतरं क्षणव्यवहारो न स्यादिति वाच्यं कर्मांतरसत्त्वादिति महाप्रलये क्षणव्यवहारो यद्यप्यस्ति तदा नाप्यस्य ध्वंसेनोपपादनीय इति दिशं निरूपयति मूले दूरांतिकादिधीहेतुरेका नित्या दिगुच्यते उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् दूरत्वमंतिकत्वं च दैशिकपरत्वापरत्वं बोध्यं तद्बुद्धेरसाधारणं बीजं दिगेव दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादेकासिद्धेति भावः नन्वेकैव दिग् तत्र प्राच्यादिव्यवहारः कथमुपपद्यतामिति अत आह उपाधीति यत्पुरुषस्योदयगिरिसन्निहिता दिक् तत्पुरुषस्य प्राची एवं तत्पुरुषायस्तमेरुसन्निहितादिगुदीची तद्व्यवहिता तु अवाची सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति वचनात् आत्मानं निरूपयति आत्मेंद्रियाद्यधिष्ठाता करणं हि सकर्तृकं आत्मेति आत्मत्वजातिः सुखदुःखसमवायिकारणतावच्छेदकतया सिद्ध्यति ईश्वरेऽपि सा जातिरस्ति एवमदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः नित्यस्य स्वरूपसंयोगस्य फलोपधायित्वाभावि इत्यस्याप्रयोजकत्वात् अपरे तु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानाश्रयत्वेन विभजनादित्याहुः इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः यद्यप्यात्मन्यहं जाने अहं करोमीत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्न एव तत्प्रतिगोचर इति प्रतिपादयितुं न शक्यत इत्यतः प्रमाणं दर्शयति करणं हि सकर्तृकं वास्यादीनां छिदाकरणानां कर्तारमंतरेण फलोपधानमपि न दृष्टं एवं चक्षुरादीनां ज्ञानकरणानामपि कर्तारमंतरेण फलोपधानमपि नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ननु शरीरस्यैव कर्तृत्वमस्त्वित्यत आह शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ननु चैतन्यं ज्ञानादिकमेव मृतात्मना तन्मते च मृतशरीराणामपि तदभावे का क्षतिः प्रमाणाभावे न ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यं अनंतसंस्कारकल्पने गौरवं एवं शरीरचैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धेतुत्वात् तदानीमिष्टसाधनत्वानुभावकाभावात् मन्मते तु जन्मांतरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च जन्मांतरानुभूतमन्यदपि स्मर्यतामिति वाच्यं उद्बोधकाभावात् अत्र तु जीवनादृष्टमेवोद्बोधकं कल्प्यते इत्थं च संसारस्यानादितया आत्मनोऽनादित्वसिद्धौ अनादिभावस्य नाशासंभवान्नित्यत्वं संभवतीति बोध्यं न च चक्षुरादीनामेव ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे बाधकाभावात् अत आह तथात्वमिंद्रियाणां चेदुपघाते कथं स्मृतिः तथात्वं चैतन्यं उपघाते नाशे सति अयं चक्षुरादीनामेव कथमिति पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मृतिर्न स्यात् अनुभवितुरभावात् अन्यानुभूतस्यान्येन स्मरणायोगात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः मनोऽपि न तथा न तथा चेतनं ज्ञानाद्यनध्यक्षं तदा भवेत् मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वात् मनसि च ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तेः यद्यपि मनसोऽणुत्वं तथाप्येवं दूषयते चेष्टाद्यनुमेयोऽयं रथगत्येव सारथिः अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता नन्वस्तु विज्ञानमेवात्मा॥

(left margin) खंडनो

(right margin) तार्किकाः १७ कणादादीनां

मनःप्रवृत्तिः ५

ख्या- मु- ५

5

धा

तस्य ततः प्रकाशरूपत्वाच्चैतन्येऽज्ञानस्त्वखादिकं तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वस्योत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निराबाधैव मृगमदवासनया वसनेइव पूर्वपूर्वविज्ञानजनितसंस्कारस्योत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्वरूपादेरिति चेन्न तस्य तद्विषयकत्वे सार्वज्ञापत्तेः यत्किंचिद्विषयकत्वे विनिगमकाभावः सुषुप्तावपि विषयाभासप्रसंगश्च न दानीं निराकारा निर्विषयिका चित्सैतन्निरवर्त्तते इति चेन्न तस्याः प्रकाशत्वे मानाभावात् अन्यथा घटादीनामपि विज्ञानत्वापत्तिः न चेष्टापत्तिः विज्ञानव्यतिरिक्तस्य वस्तुनोऽभावादिति वाच्यं घटादेस्तु भूयमानस्यापलपितुमशक्यत्वात् आकारविशेषएवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञानान्न हि समयातं विज्ञानव्यतिरिक्तेन नातिरिच्यते चेन्न हि स्वरूपावलम्बनेन नीलाकारोपि

बोधकत्वरूपः

पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न नीलत्वादीनां विरुद्धानामेकस्मिन्समवेशात् इतरथा समूहालम्बनानंगीकारे विरोधावधारणस्यैव दुरुपपादत्वात् न वा वासनासंक्रमः संभवति मातृपुत्रयोरपि वासनासंक्रमप्रसंगात् न चोपादानोपादेयभावो नियामक इति वाच्यं वासनायाः संक्रमासंभवात् न चोत्तरस्मिन्नुत्पन्ने सैव संक्रम इति चेन्न तदुत्पादकाभावात् चित्तामेवोत्पादकत्वेन संसारानन्त्यप्रसंगः क्षणिकविज्ञाने च तिरस्कार्यविशेषः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवात् एतेन क्षणिकविज्ञानं शरीरे एव चेतन्यमिति प्रत्युक्तं गौरवात् अतिशयेन मानाभावात्

समष्टि दृष्टि

बीजादावपि सहकारिसमवधाना समवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात् अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा अविनाशित्वादयमात्मा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतेश्चेति तन्न तस्य सविषयत्वात् भवत्पदर्शितत्वान्निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयस्याप्यननुभवात् अतो ज्ञानभिन्नो नित्य आत्मेति सिद्धं सत्यं विज्ञानमिति ब्रह्मपरं जीवे तूपचर्यते ज्ञानाज्ञानसुखदुःखादिमत्त्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः अन्यथा बंधमोक्षानुपपत्तेः योऽपीश्वराभेदबोधको वेदः सोऽपि तदीयत्वप्रतिपादयन्स्तौति अभेदभावनयोपासितव्यमित्यर्थः अत एव सर्व एवात्मनः समर्पिता इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न भेदस्य नित्यत्वेन नाशायोगात् भेदनाशेपि सत्यस्वरूपं तदितिवद्वित्वाभावेपि द्वयात्मकौ ना विशिष्टत्ववत्त्वात् मिथ्यात्वाभावोऽधिकरणत्वकस्तत्र सत्यत्वमिति चेत् एकत्वाभावो व्यक्तिद्वयात् द्वित्वमित्युपुच्यताम् प्रत्येकमेकत्वेपि पृथिवीजलयोर्न गंधः इति वदुभयं नैमित्तिकमित्यस्य सर्वजनसिद्धत्वात् योपि नदानीमभेदप्रतिपादक आगमः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति संपदाधिक्ये: पुरोहितोयं राजा संवृत्त इतिवत् अत एव निरंजनः परमं साम्यमुपैतीति श्रूयते ईश्वरोपि न ज्ञानस्वरूपात्मा किंतु ज्ञानाश्रयः नित्यविज्ञानमानंदं ब्रह्मेत्यादौ ज्ञानपदेन ज्ञानाश्रय उक्तः यः सर्वज्ञ इत्यादिविरोधात् आनंदमित्यस्याप्यानंदवदित्यर्थः आनंदोपि दुःखाभावे नोपचर्यते भाराद्युपगमे सुखी संवृत्तोऽहमितिवत् अस्तु वा तस्मिन्नानंदो न तु स्वयमानंदः अस्तु वा मिति श्रुतेः न विद्यते सुखं यस्येति कुतो नात्र इति चेन्न कष्टकल्पनापत्तेः प्रकरणविरोधात् आनंदमित्यत्र मत्वर्थीयप्रत्ययविरोधादिति संक्षेपः एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किंतु चेतनः कार्यकारणयोरभेदात् कार्येनाशसति कार्यरूपतया नाशेन स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानस्यानुपपत्त्या तत्कल्पने बुद्धिप्रकृतेः परिणामः सैव सहकारिमन्तःकरणमित्युच्यते तत्संबन्धात् सत्वोत्पत्ति पुरुषस्य संसारापवर्गौ तस्य एवं इंद्रियप्रणालिकया परिणतिः लोनरूपाद्याकारादिनासंबंधः पुरुषे कर्त्तृत्वाभिमानो बुद्धौ चैतन्याभिमानस्तु भेदाग्रहात् ममेदं कर्त्तव्यमिति मंदधीः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिंबादनात्विकोदर्पणस्येव मुखोपरागः इदमिति विषयोपरागः इंद्रियप्रणालिकया परिणतिभेदस्तात्विकः निःश्वासाभिहतदर्पणस्येव मलिनिमा कर्त्तव्यमिति व्यापारावेशः तेनाद्रूपवर्त्ती बुद्धिसत्वपरिणामेन ज्ञानेन पुरुषस्यातात्विकः संबंधोदर्पणमलिनेव मुखस्योपलक्ष्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्यप्रतीतेः सिद्धेः नैमानाभावाच्चेतनोऽहं करोमीति प्रतीतेः परिणामित्वाच्चैतन्या शोऽभ्रम इति चेन्न कृत्यंशे विकिं नेष्यते अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावः अनित्यत्वेन तत्पूर्वमसंसारापत्तिः अचेतनायाः प्रकृतेः कार्यत्वाद्बुद्धेश्चेतनस्य कार्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कोऽनित्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वमनादेर्नाशासंभवान्नित्यत्वे तत्किं प्रकृत्यादिकल्पनेन न च प्रकृतेः क्रियमाणानि गुणैः कर्माणि

सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन न विरोध इति वाच्यं प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैर्गुणैरिच्छादिभिः कर्ताहं कर्ताहमेवेत्यस्य तदर्थत्वात् तदेवं
सति कर्तारमात्मानं केवलं तु य इत्यादि वदता भगवता एवाटीकितो यदनुपपत्त्युदाय यदुक्तिसंक्षेपः बुद्धेः प्रपंचं दर्शयति बुद्धिस्तु द्विविधा मता हेति ध्यधुमादय
ति अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दजे इंद्रियजन्यं ज्ञानं प्रत्यक्षं यद्यपि मनोरूपेंद्रियजन्यं सर्वमेव ज्ञानं तथापी
द्रियत्वेन रूपेण इंद्रियाणां यत्र ज्ञानकारणत्वं तत्प्रत्यक्षमिति विवक्षितं ईश्वरप्रत्यक्षं तु न लक्ष्यं इंद्रियार्थसन्निकर्षजन्यमिति तु सूत्रे तथैवोक्तत्वात् अथवा ज्ञा
नाकरणकं ज्ञानं प्रत्यक्षं अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे अनुभवस्य करणत्वात् न तत्रातिव्याप्तिः इदं लक्षणमी
श्वरप्रत्यक्षसाधारणं परामर्शजन्यं ज्ञानमनुमितिः यद्यपि परामर्शप्रत्यक्षात्मकं परामर्शजन्यं तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः न च
कदाचित् हेतुविषयेप्यनुमितौ अव्याप्तिरिति वाच्यं तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः एवं
सादृश्यज्ञानकरणकं प्रत्यक्षावृत्तिजातिमत्त्वमुपमितित्वं एवं व्यक्तिं चक्षुस्त्वादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षादिकं वा व्यमिति सं
क्षेपः घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं घ्राणजं चाक्षुषं रासनं स्पार्शनं श्रौत्रं मानसमिति षड्विधं प्रत्यक्षं घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृतः
ग्राह्य इत्यर्थः गंधत्वादिरित्यादिपदात् सुरभित्वादिपरिग्रहः गंधस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यं त
था रसो रसना ग्राह्यस्तथा शब्दोपि च श्रुतेः रसत्वादिसहित इत्यर्थः तथा शब्दत्वादिसहितः गंधो रसश्चोद्भूतो बोध्यः उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्व
ति पृथक्त्वसंख्याः विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तं क्रियाजातियोग्यवृत्तिः समवायश्च तादृशः ग्रीष्मोष्मादावनुद्भूतरूपमिति नेतत्प्र
त्यक्षं तद्वृत्ति उद्भूतरूपवति योग्येति पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तिबोध्यं तादृशो योग्यव्यक्तिवृत्तिः चक्षुर्योग्यत्वमेव कथं तदाह गृह्णाति चक्षुः
संबंधादालोकोद्भूतरूपयोः आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबंधेन कारणत्वं द्रव्यसमवेतप्रत्य
क्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति उद्भूतस्पर्शवत् द्रव्यगोचरः सोपि च त्वचः
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः रूपान्यच्चक्षुषो योग्यं रूपमात्रस्य कारणं द्रव्याध्यक्षे रूपभिन्नं रूपत्वादिभिन्नं चक्षु
षो योग्यं तत्त्वगिंद्रियस्यापि ग्राह्यं न चाच पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रियाजातयो योग्यवृत्तयः समवायश्च चाक्षुषा इति अत्रापि त्वगिं
द्रियजन्येपि द्रव्यप्रत्यक्षे रूपं कारणं तथा च बहिरिंद्रियजन्ये द्रव्यप्रत्यक्षे रूपं कारणमिति नवीनास्तु बहिर्द्रव्यप्रत्यक्षे न रूपं कारणं प्रमाणाभावात् किं
तु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणं अन्वयव्यतिरेकात् बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेन्न किंचित् आत्माहत्ति
प्राहुमित्रविशेषगुणवत्त्वं वा प्रयोजकमस्तु रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिंद्रियेण ग्रहणप्रसंगात् इष्टापत्तिरिति चेत् स्पर्श एव लाघ
वात् कारणमस्तु प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं न स्यात् तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य सत्त्वात् द्वयोरपि प्रत्यक्षत्वं भवत्येव
बहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकत्वादिग्रहणं त एव कोचिद्द्वित्वादिकमपि कोचित्त्वपरिमाणाद्यग्रहो दोषादित्याहुः
त्वङ्योगो मनसा ज्ञानकारणत्वं त्वङ्मनःसंयोगो ज्ञानसामान्यकारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमाने न म
नसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा नाद्यः अनुभवसामग्र्यभावात् तथाहि प्रत्यक्षे चक्षुरादि
नासहृत्मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं ज्ञानादेरभावादेव न मानसप्रत्यक्षं ज्ञानाद्यभावे चात्मनोपि न प्रत्यक्षमिति व्या
प्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोधः इत्यनुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावाच्च न स्म
रणमेव सुषुप्तिप्राक्काले पत्रेकादिव्यक्तिसंबंधेनात्मनः प्रत्यक्षप्रसंगात् तदतींद्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेव नि
यमेन जायत इत्यत्र प्रमाणाभावात् अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् विषयत्व

अत्र केचित्तु ... नो योगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः
नां योगस्य त्वग्मनःसंयोगस्य चाभावात् परस्परप्रतिबंधादिकमपि वाच्यमित्यादि चाक्षुषादिप्रत्यक्षकाले चर्ममनःसंयोगा
स्यावीनादिप्रतिबंधकत्वमनुभवानुरोधात् कल्प्यमिति अत्र तु त्वङ्मनोयोगस्य ज्ञानहेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षकाले चर्ममनःसंयोगा
भावात्तत्रात्र प्रत्यक्षमिति ॥ मनोग्राह्यं सुखं दुःखमिच्छाद्वेषौ मतिः कृतिः मनोजन्यप्रत्यक्षविषयमित्यर्थः मतिर्ज्ञानं कृतिर्यत्नः एवं सुखदुःखत्वादिक
मपि मनोग्राह्यं एवमात्मापि मनोग्राह्यः किंतु मनोमात्रस्य गोचरइत्यनेन सर्वस्मात्तदाहेति ज्ञानं सविकल्पं त्वनिन्द्रियमिष्यते चक्षुःसं
योगानंतरं घटइत्याकारकं घटत्वादिविशिष्टं ज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् न
याचप्रथममेव घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्पकं तच्च निर्विकल्पत्वेन प्रत्यक्षं न यथा हि वैशिष्ट्यानवगाहि ज्ञानस्य प्रत्य
क्षं न संभवति घटमहं जानामीति प्रत्ययात् न त्वात्मविज्ञानं प्रकाशतयाभासते ज्ञाने घटस्तत्र घटत्वं प्रकारो यः स एव विशेषणमुच्यते विशेषणेयद्विशे
षणं तद्धि विशेषणतावच्छेदकमुच्यते विशेषणतावच्छेदकज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशि
ष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति जात्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मकारणत्वनियमात्
महत्त्वं षड्विधे हेतुः द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन कारणं द्रव्यसमवेतानां गुणकर्मसामान्यादीनां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसम
वेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति इंद्रियं कारणं मतं विषयेंद्रियसंबंधो व्यापारः सोपि षड्वि
धः अत्रापि षड्विधे हेतुः इन्द्रियत्वं तु शब्देन रोद्भूतविशेषगुणाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं आत्मादिवारणाय सत्यंतं उद्भूतवि
शेषगुणस्य श्रोत्रेपि सत्त्वाद्धेतुरेति विशेषगुणस्य रूपादेः चक्षुरादावपि तत्त्वादुद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना संकरात् न च शुक्लत्वा
दिव्याप्यनानैवोद्भूतत्वमिति वाच्यं उद्भूतरूपत्वादिना चाक्षुषत्वादौ जनकत्वानुपपत्तेः किंच शुक्लत्वादिव्याप्यनानैवोद्भूतत्वे तदभाव एवानुद्भूत
त्वे न तु मनोयोगादावप्यस्ति न याचशब्देन रोद्भूतगुणः संयोगादिः चक्षुरादावप्यस्ति अतो विशेषेति कालादिवारणाय विशेष्यदलं इंद्रियावयववसं
योगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिंद्रियावयववारणाय कालादेरूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य
कालादेर्वारणाय मनःपदं ज्ञानकारणमित्यपि तद्वारणाय करणमिति असाधारणकारणं करणं असाधारणत्वं व्यापारवत्त्वं व्यापारः सन्नि
कर्षः षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः द्रव्येषु समवेतानां तेषां तत्समवायतः तत्रापि स
मवेतानां शब्दस्य समवायतः तद्वृत्तीनां समवेतसमवायेन तु ग्रहः विशेषणतया तद्वदभावानां ग्रहो भवेत् यदि स्यादुपलभ्येत्येवं यत्र प्रस
ज्यते प्रत्यक्षसमवायस्य विशेषणतया भवेत् द्रव्यप्रत्यक्षमिंद्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तसमवायजन्यं एवमग्रेपि बलु
नत्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणं एवमन्यत्रापि विशिष्टैव कार्यकारणभावः परं तु पृथिवीपरमाणौ नीलत्वे नीलत्वे पृथिवीत्वे च चाक्षुषं न
गृह्यते तत्र परंपरया उद्भूतरूपस्य महत्त्वस्य च सत्त्वात् तथाहि नीलत्वजातिरेकैव परमाणौ नीलेवर्तते तया च महत्त्वे संबंधो घटमादाय वर्तते तद्
पसत्त्वघस्तु भयमादाय वर्तते एवं पृथिवीत्वे घटादिकमादाय महत्त्वसंबंधो बोध्यः एव बाध्यतदीयस्पर्शादौ बलात्ताश्रयोद्भूतरूपमहत्त्वस्यात् तस्मा
दुद्भूतरूपावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे कारणत्वं वाच्यं इत्यं च परमाणु
नीलादौ न नीलत्वादिग्रहः परमाणुचक्षुःसंयोगस्य महत्त्वावच्छिन्नसंयुक्तसमवेतत्वाभावात् एवं वाय्वादौ नसत्त्वादि चाक्षुषं तत्र चक्षुःसंयोगस्य रूपा
वच्छिन्नत्वाभावात् एवं घटपरस्य पृष्ठावच्छेदेनालोकसंयोगस्तु चक्षुःसंयोगस्य यावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशे
षणं बोध्यं एवं द्रव्यस्पर्शनप्रत्यक्षेत्वक्संयुक्तसमवेतसमवायः कारणं अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतरूपावच्छिन्नत्वं च पूर्ववद्बोध्यं एवं गन्धप्र
त्यक्षे घ्राणसंयुक्तसमवायः रसप्रत्यक्षे रसनसंयुक्तसमवायः गंधसमवेतस्य घ्राणसंयुक्तसमवायः शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्न

रूपत्वे घ्राणसंयुक्तसमवेतसमवायः रससमवेतस्य रसनप्रत्यक्षे रसनसंयुक्तसमवेतसमवायः कारणं शब्दप्रत्यक्षे श्रोत्रावच्छिन्न

समवेतसमवायः अत्र सर्वत्र प्रत्यक्षं लौकिकं बोध्यं वक्ष्यमाणमलौकिकप्रत्यक्षमिंद्रियसंयोगादिकं विनापि भवति एवमात्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणं अभावप्रत्यक्षे समवायप्रत्यक्षे च इंद्रियसंबद्धविशेषणता हेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः यदि स्यादिति अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं तथाहि भूतलादौ घटादिज्ञाने तदभावज्ञानं न जायते तेनाभावोपलंभे प्रतियोग्युपलंभाभावः कारणं तत्र योग्यतापि चापेक्षिता सा च प्रतियोगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसंजित उपलंभरूपः प्रतियोगी यस्य स उपलंभाभावोऽभावप्रत्यक्षे हेतुः तथाहि यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येत इत्यापादयितुं शक्यते तेन घटाभावादिप्रत्यक्षं भवति अंधकारे तु नापादयितुं शक्यते तेन घटाभावादेरंधकारे चाक्षुषप्रत्यक्षं न स्पार्शनप्रत्यक्षं तु भवत्येव आलोकसंबंधं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षः तत्र गुरुत्वाद्यापादयितुमशक्यत्वात् वायौ रूपाभावः पाषाणे रसाभावः गुडे तिक्ताभावः वह्नौ तु स्पर्शाभावः श्रोत्रे शब्दाभावः आत्मनि सुखाद्यभावः एवमादयस्तत्तदिंद्रियैर्गृह्यन्ते तत्र तत्र तत्त्वस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगियोग्यत्वं अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यत्वमपेक्षितं अतः स्तंभादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा उक्ताः अलौकिकसन्निकर्षा निरूप्यंते इति अलौकिक इति आपर्सन्निकर्षः अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा सामान्यलक्षण इति सामान्यं लक्षणं यस्येत्यर्थः तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपप्रत्यासत्तिरित्यर्थो लभ्यते तत्र इंद्रियसंबद्धविशेष्यकज्ञाने प्रकारीभूतं बोध्यं तथाहि यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं जातं तत्र ज्ञाने धूमत्वं प्रकारः तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलविषयकं ज्ञानं जायते अत्र यदींद्रियसंबद्धमित्युच्येत तदा यत्र धूलीपटले धूम इति ज्ञानं तत्र धूमत्वेन रूपेण सकलधूमविषयकं ज्ञानं स्यात् तत्र धूमत्वेन सह इंद्रियसंबंधाभावात् मन्मते तु इंद्रियसंबद्धधूलीपटलेन हि विशेष्यकं धूम इति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः इंद्रियसंबंधस्तु लौकिको ग्राह्यः इदं च बहिरिंद्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं सन्निकर्षः परंतु समानानां भावः सामान्यं तच्च क्वचिन्नित्यं धूमत्वादि क्वचिदनित्यं घटादि यत्रैको घटः संयोगसंबंधेन भूतले समवायसंबंधेन कपाले वा ज्ञातः तदनंतरं सर्वेषामेव घटवतां भूतलादीनां कपालानां वा ज्ञानं भवति तत्रेदं बोध्यं परंतु सामान्यं येन संबंधेन ज्ञायते तेन संबंधेनाधिकरणानां प्रत्यासत्तिः किंतु यत्र तद्घटनाशानंतरं तद्घटवत्तया स्मरणं ज्ञानं तत्र सामान्यलक्षणया सर्वघटवत्ताज्ञानं न स्यात् सामान्यस्य तदानीमभावात् किं चेंद्रियसंबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसंबंधं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात्सकलघटविषयकं ज्ञानं कुतो न जायते तस्मात्सामान्यज्ञानं प्रत्यासत्तिः ननु सामान्यमित्याकांक्षायामाह आसत्तिरिति आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते प्रत्यासत्तिरित्यर्थः सामान्यज्ञानमिति सामान्यज्ञानमित्यत्र लक्षणशब्दस्य विषयोऽर्थः तेन सामान्यविषयकज्ञानं प्रत्यासत्तिरिति लभ्यते ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां प्रत्यक्षं स्यादत आह तदिंद्रियजेति तदिंद्रियजन्यतद्धर्मबोधसामग्र्यपेक्ष्यते अस्यार्थः यदा बहिरिंद्रियेण सामान्यलक्षणया सकलघटादीनां प्रत्यक्षज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिंद्रियजन्यज्ञानसामग्र्यपेक्षिता सा च सामग्री चक्षुःसंयोगालोकसंयोगादिक तेनांधकारादौ चक्षुरादिना तादृशज्ञानं न जायते ननु ज्ञानलक्षणप्रत्यासत्तिर्ज्ञानरूपा यदि सामान्यलक्षणापि ज्ञानरूपा तदा नयोर्भेदो न स्यादत आह विषयीति विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः सामान्यरूपप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ज्ञानलक्षणप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति अयमर्थः प्रत्यक्षे सन्निकर्षं विना ज्ञानं न संभवति धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च ज्ञानं कथं भवतु तदर्थं सामान्यलक्षणा स्वीक्रियते न च सकलवह्निधूमयोर्व्याप्त्यभावे कारणमिति वाच्यं प्रत्यक्षधूमे वह्निसंबंधग्रहेऽपि कालांतरीयधूमस्य चानुपस्थितत्वात् धूमो वह्निव्याप्तो न वेति संशयानुपपत्तेः मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालांतरीय देशांतरीयधूमे वह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सर्वज्ञत्वापत्तिरिति वाच्यं प्रमेयत्वेन सकलज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन,

सार्वज्ञाभावात् एवं ज्ञानलक्षणायामस्वीकारे सुरभि चंदनमिति ज्ञाने सौरभस्य भानं कथं स्यात् यद्यपि सामान्यलक्षणया सौरभस्य भानं संभवति तथापि सौरभत्वस्य ज्ञानं
ज्ञानलक्षणया योगज इति योगजो द्विविधः युक्तयुंजानभेदतः युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिकप्रमाणक इ
त्यर्थः युक्तेति युक्तयुंजानयोर्द्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः युक्तस्येति योगाभ्यासवशीकृतमानसः समाधिसमासादितविविधसिद्धिर्युक्त इत्युच्यते
अयमेव विप्रकृष्टवाग्वलादिर्युक्त इत्युच्यते सर्वदेति चिन्तासहकारितां विनेत्यर्थः भानं विषयाणां प्रत्यक्षमपरो युंजानः चिन्तनेन व्यावृत्तमानसः समाधिस्याद्यु।
ज्ञान इत्युच्यते चिन्ताध्यानं मनसः स्तदृष्टीकोऽयं सामान्यतस्तस्य व्यवहितविप्रकृष्टानर्थानवलोकयतीत्यर्थः एवं धूमत्वेन धूलीपटले
यज्ज्ञानं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया योगिनां द्विविधा युक्ता युंजानश्च अतो योगजस्य धर्मस्यापि द्वैविध्यं युक्तस्य तावद्योगजधर्मस
हायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति अनुमितिं व्युत्पादयति व्यापारस्त्वि
ति व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् अनुमायां ज्ञायमानं लिंगं तु कारणं न हि अनुमायां अनुमितौ व्याप्तिज्ञानं करणं व्यापारः परामर्शः तथाहि येन पुरु
षेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित्पर्वतादौ अविच्छिन्नमूलां धूमलेखां पश्यति तदनंतरं च धूमो वह्निव्याप्य इत्येवंरूपं व्याप्ति
स्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते तदनंतरं पर्वतोऽयं वह्निमानिति ज्ञानं जायते तदेवानुमि
तिः तत्र प्राचीनास्तु वदंति व्याप्यत्वेन ज्ञायमानं लिंगमनुमितिकरणं तद्दूषयति ज्ञायमानं लिंगं तु करणं न हि लिंगस्यानुमित्यकरणत्वे युक्तिमाह अनागता
दिरिति अनागतादिलिंगेन न स्यादनुमितिस्तदा यद्यनुमितौ करणं लिंगं स्यात्तदानागतेन विनष्टेन वा लिंगेनानुमितिर्न स्यात् अनुमितिकरणस्य लिंग
स्य तदानीमभावादिति व्याप्तस्य पक्षधर्मत्वधीः परामर्श उच्यते व्याप्तस्य पक्षवृत्तित्वधीः परामर्श उच्यते व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि
ज्ञानं अनुमितौ जनकं तच्च व्याप्यः पक्षे इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमित्याकारिका पक्षो व्याप्य
वानिति ज्ञानात्पक्षः साध्यवानिति द्विविधादपि परामर्शात्पक्षः साध्यवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादनुमितिः।
दर्शनाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं किंतु व्याप्यत्वावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वं आवश्यकत्वात् वि
शिष्टज्ञानकल्पने गौरवाच्चेति चेन्न व्याप्यतावच्छेदकप्रकारकं ज्ञानं विनापि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रकारकप
क्षधर्मताज्ञानस्य सत्त्वात् न च गृह्यमानव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्ववाच्यं चेत्तस्य व्याप्तिग्रहेऽमेयस्य पक्षधर्मताज्ञानादनु
मित्यापत्तेः यदि तु तत्पुरुषीयगृहीतव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदानन्त्यका
र्यकारणभावः यद्वा व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतंत्रकारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूमस्तत्र आलोकवा
न्पर्वत इति ज्ञानादनुमितिः स्यादिति इत्थं च ज्ञानद्वयं यत्र तत्रापि विशिष्टज्ञानं कल्पनीयं फलमुखगौरवस्यादोषत्वादिति व्याप्यो नाम व्याप्त्या
श्रयः तत्र व्याप्तिः केत्यत आह व्याप्तिरिति व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदाहृतः वह्निमान्धूमादित्यादौ साध्यो वह्निः साध्यवान्महानसा
दिस्तदन्यो जलह्रदादिस्तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मिन्नयःपिंडादौ वह्निसत्त्वान्नातिव्याप्तिः अ
त्र येन संबंधेन साध्यं तेनैव साध्यवान्बोध्यः अन्यथा समवायसंबंधेन वह्निमान्वह्न्यवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वादव्याप्ति
प्रसंगात् साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान्बोध्यः तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्ष
तिः साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वसामान्याभावः तेन धूमवान्वह्नेरित्यत्र साध्यवदन्यह्रदादित्वाभावेऽपि नातिव्याप्तिः अन्यथा
पि द्रव्यगुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्यात् साध्यवदन्यस्मिन्गुणादौ अवृत्तित्वं नास्ति तथापि हेतुता

वच्छेदकरूपेणावृत्तित्वं वाच्यं हेतुतावच्छेदकं यद्वृत्तित्व सत्तानवच्छेदकमिति फलितोऽर्थः नतु केवलान्वयिनि ज्ञेयत्वादौ साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः किंच ह
त्वावान् ज्ञानेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसंबंधेन समवायेन हेतोरप्रसिद्धत्वादव्याप्तिर् ~~किंच समवा~~ नस्मात् अथ एवेति अथ एवाह हे
तुमन्निष्ठविरहप्रतियोगिना साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते हेतुमति निष्ठावृत्तिर्यस्य तथाविधो विरहोऽभावः तथा च हेत्वधिकरणवृत्तिर्यो
भावः तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः अत्र यद्यपि वह्निधूमयोरेव व्याप्तिरिति वाच्यं न हेतोः संयोगाभावादिसत्वादे
कसत्वेपि द्वयं नास्तीति प्रतीतेः गुणवान्द्रव्यत्वादित्यादौ अव्याप्तिश्च तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकमिति वाच्यं ननु रूपत्वजाति
मद्वान् पृथिवीत्वादित्यत्र साध्यतावच्छेदिका रूपत्वव्याप्यजातयस्तासां च शुक्लत्वादिरूपाणां नीलघटादिरूपाभावप्रतियोगितावच्छेदकत्वमस्तीति
अव्याप्तिरिति चेन्न तत्र परंपरया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति रूपत्वव्याप्यजा
तिमान्नास्तीति प्रत्ययापत्तेः साध्यादिभेदेन तादृशभेदात्तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदंति देश
दौ साध्ये परंपरासंबंधेन दण्डत्वादिकमेव साध्यतावच्छेदकं साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकानवच्छेदकत्वमिति वाच्यं हेत्वधिकरणं च हेतु
तावच्छेदकविशिष्टाधिकरणं वाच्यं तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ शुद्धसत्ताधिकरणे गुणादिनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्वस्य नाव्याप्तिः।
हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं तेन समवायेन धूमाधिकरणे तदवयवनिष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः अभावश्च प्रतियोग्यव्यधिक
रणो बोध्यः तेन कपिसंयोगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेपि कपिसंयोगस्य नाव्याप्तिः नच प्रतियोगिव्यधिकरणत्वं
यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तत्र एवाव्याप्तिः प्रतियोगिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्तते योऽभावस्तस्यैव हेतौ मूलावच्छेदेन सत्वात् यदि प्रति
योग्यनधिकरणवृत्तित्वं तदा संयोगी सत्वादित्यादौ अतिव्याप्तिः सत्ताधिकरणे गुणादौ संयोगाभावस्य प्रतियोग्यधिकरण इव वृत्तित्वादिति वाच्यं हेत्व
धिकरणे प्रतियोग्यनधिकरणवृत्तित्व विशिष्टविवक्षितत्वात् प्रतियोग्यनधिकरणं हेत्वधिकरणमिति निष्कर्षः प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेद
कावच्छिन्नानधिकरणं बोध्यं तेन विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणे गुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपि न क्षतिः अत्र च साध्य
तावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं वाच्यं तेन ज्ञानवान् द्रव्यत्वादित्यादौ सत्ताधिकरणघटादेर्विषयतासंबंधेन ज्ञानाधिकरणत्वेपि न क्षतिः इत्यपि च वाच्य ।
वह्निमान्धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्वेपि न क्षतिः ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं न
तत्सामान्यस्य वा किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं विवक्षितं आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसंयोगाभावस्य
प्रतियोगिनि विशिष्टे तावच्छेदकावच्छिन्नो वृक्षादिवृत्तिरपि कपिसंयोगो भवति तदधिकरणं वृक्ष इति द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः
सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् नच वह्निमान्धूमादित्यादौ घटाभावादेः स्वान्यत्वेन
… तने यद्यपि पर्वतादे … च्छेदकसंबंधेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाप्रसि
… न यथा घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादीति क्रमेण प्रतियोगि
… भिन्नत्वमुच्यते तथापि धूमाभाववान्वह्न्यभाववादित्यादावव्याप्तिः तत्र साध्य
… पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति
… कपिसंयोगाऽभावः कपिसंयोगस्तस्य प्रतियोगितावच्छेदकं गुणसामान्याभा
… ते यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृश
… दि … प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरण म

...र्तं येन विशेषणेन यावत्योग्यधिकरणावृत्तित्वात् अत्र केचित् महाकालान्यत्वविशेषणेन... मद्याकालान्यत्वविशिष्टघटानाधारत्वात् महाकाले महाकालभेदाभावात् व... तद्वधिकरणवृत्त्यभावप्रतियोगिता सामान्येयत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वो... व्यापकसामानाधिकरण्यं च व्याप्तिः इत्यत्र कालेघटवान्कालपरिमाणादित्यादौ संयो... वान्कालिकसंबंधावच्छिन्नत्वघटत्वा... न: स एव संयोगेन घटाभाव तत्प्रतियोगिता यावत्कालिकसंबंधावच्छिन्नत्वघटत्वा... दित्यादौ प्रमेयत्वावच्छिन्नत्वमप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न गुरुधर्मस्या... नतु प्रमेयवा... वह्नि... सत्वेऽपि तत्र सपक्षत्र

एवकथं... प्रमेयवा... दित्यादौ... किं न दाह सिषाधयिषयति सिषाधयिषया सत्त्वात् सिद्धिर्यत्र नतिष्ठति सपक्षत्र एवकथं तत्सत्त्वीकारात्मसस्य: पक्षवृत्तित्वमित्यत आह किं न दाह सिषाधयिषामात्रं न पक्षता विनापिसिषाधयि... वृत्तिल्यानादनुमितिर्भवेत् सिसाधयिषाविरहविशिष्टाया: सिद्धेरभाव: पक्षता न ह्यस्यार्थ इत्यर्थ: सिषाधयिषामात्रं न पक्षता विनापि सिषाधयिषासत्वेऽ... घनगर्जितेन मेघानुमानात् अत एव साध्यसंदेहोऽपि न पक्षता विनापि संदेहं घनगर्जितेन मेघानुमानात् सिद्धौ सत्यामपि सिषाधयिषासत्त्वे... नुमितिर्भवत्येव अत: सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणं न चाच यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता यत्र सि... षाधयिषास्ति तत्र सिद्धौ सत्यामसत्यां च पक्षता यत्र चासिद्धिरस्ति सिषाधयिषा नास्ति तत्र न पक्षता सिषाधयिषाविरहविशिष्टसिद्धे: सत्त्वात् नन्वयत्र... परामर्शानन्तरं सिद्धिस्तत: सिषाधयिषा तत्र सिषाधयिषाकाले परामर्शनाशात्रानुमिति: यत्र सिद्धिपरामर्शसिषाधयिषा: क्रमेण भवंति तत्र सिषाध... षाकाले सिद्धेर्नाशात् प्रतिबंधकाभावादेवानुमिति: यत्र सिषाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले सिषाधयिषैव नास्ति एवमन्यत्रापि। सिद्धिकाले परामर्शकाले वा न सिषाधयिषा योग्यविभुविशेषगुणानां योगपद्यनिषेधात् अत: सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति अत्रेदं दो... चेन्न यत्र वह्निव्याप्यधूमवानयं वह्निमानिति प्रत्यक्षं स्मरणं वा तत: सिषाधयिषा तत्र पक्षता संपन्ना येन हि सा ... लिंगकानुमिता... यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिंगकानुमिति: तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभाव: तल्लिंगकानुमिति... पक्षता तेन सिद्धिपरामर्शसत्त्वे यत्किंचिज्ज्ञानं जायतामितीच्छायामपि नानुमिति: वह्निव्याप्यधूमवानयं वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरि... क्तज्ञानं जायतामितीच्छायामनुभवत्येव एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमिति: सिषाधयिषाविरहकाले... ताहृशसिद्धिसत्त्वे नानुमितिस्तादृशसिद्धिविशिष्टावक्तव्या तेन पर्वतो वह्निमान् पाषाणमयो वह्निमानिति ज्ञानसत्त्वेऽपि अनुमितेर्न विरोध: पर्वते... क्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितेर... पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सि... द्धिरेव प्रतिबंधिका पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति ... मात्रं विरोधि इदं तु बोध्यं यत्रायं पुरुष इत्यनन्तरं ... कामिनीजिज्ञा... व्याप्यकरादिमानितिज्ञानं तत्रासत्यामनुमित्साया पुरुषस्य प्रत्यक्षं भवति नत्वनु... प्रत्यक्षाविरहविशिष्टानुमितिसामग्री भिन्नविषयक... सादिवत्स्वातंत्र्येण प्रतिबंधिका एवं परामर्शानंतरं विनाप्रत्यक्षेच्छोपपत्तादि... प्रत्यक्षाविरहविशिष्टानुमितिसामग्रीभिन्नविषयक... प्रत्यक्षे प्रतिबंधिकेति सक्षेप: हेतुप्रसंगेन हेत्वाभासान्निरूपयति अनैकान्तिको ... असाधारणस्त्वसाधारणकोपर: तथैवानुपसंहारी विधानैकान्तिको भवेत् तल्लक्षणं च यद्विषयकत्वेन ज्ञानस्यानु... हेत्वाभासास्तु पंचधा अनैकान्तिको ... यद्विषयकत्वेन यादृशविशिष्टविषयकत्वे बोध्यं मितिविरोधित्वं तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात् ते दोषा: ... मितिविरोधित्वं तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात् ... इष्टापत्ते: अन्यथा बाधस्याप्यनित्यदोषत्वापत्ते: तस्मात्तु भ्रमादनुमिति... नेन बाधभ्रमादनुमितिविरोधित्वेऽपि तत्र विशिष्टस्याप्रसिद्धत्वादिति ... एतेनानु यद्विषयकत्वे प्रतिबंधमात्रं हेतुस्तु न दृष्ट: इत्यत्र साध्याभाववद्वृत्तिहेतुत्वादिकदोषस्य हेतौ ये न केनापि संबंधेन निनग्या: ...

धा

पदार्थैकप्रकारत्वलक्षणा अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषः स्वलक्षणापत्तेः किन्तु कर्मधारये लक्षणाभावात् न च निषादस्यास्तं
कर्तृत्तीयस्य हेतुनानुपपत्तिर्कारो योग्यता न त्वसंभवाम्भिः इति वाच्यं निषादस्य विद्याप्रयुक्तेः स्वत्व एकदेशस्य नीयत्वात् लाघवेन तु ख्यार्थान्वयेन दत्त एव ख्याकल्पा
याः फलमुख्यगौरवेन मो अदृष्टत्वादिति उपकुंभमर्धपिप्पलीत्यादौ परपदेन तत्संबंधिनिलक्षणा सर्वपदार्थप्रधानत्वाच्चान्वयबोध इति इत्थं च समा
सेन क्वापि शक्तिः पदस्यार्थोपचनिर्वाहादिति आसत्तियोग्यतेत्यादि आसत्तियोग्यताकांक्षातात्पर्यज्ञानमिष्यते कारणं सन्निधानं तु पदस्यासत्तिरुच्य
ते आसत्तिज्ञानं योग्यताज्ञानं आकांक्षाज्ञानं तात्पर्यज्ञानं च शाब्दबोधे कारणं तत्रासत्तिः पदार्थस्माद् सन्निधानमिति यत्पदार्थेन यत्पदार्थस्यान्वयो
पेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणं तेन गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ न शाब्दबोधः एकपदोपस्थित्यव्यवधानेनापरप
दोपस्थितिर्ज्ञायतामिति तात्पर्यगर्भासत्तिज्ञानं शाब्दबोधे कारणं नीलो घटो द्रव्यं पट इत्यासत्तिभ्रमात् शाब्दभ्रमः आसत्तिभ्रमेण शाब्दभ्रमाभा
वेपि न क्षतिः ननु छत्री कुंडली वासस्वी देवदत्त इत्यादावुक्तं तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशाद् व्यवधानेन तत्त्वपदस्मरणसंभ
वइति चेन्न प्रत्येकपदानुभवजन्यानेकसंस्कारैः समूहालंबनात्मकस्मरणस्याव्यवधानेनोत्पत्तेः नानासन्निकर्षैकप्रत्यक्षस्येवानेकसंस्का
रैरेकस्मरणोत्पत्तेरपि संभवात् तावत्पदसंस्कारसहितचरमवर्णज्ञानेनैव बोधकत्वात् कथमन्यथा नानावर्णैरेकपदस्मरणं परं
तु तावत्पदानां स्मरणादेकदैव खलेकपोतन्यायात् तावदर्थानां क्रियाकर्मभावेनान्वयरूपः शाब्दबोधो भवतीति केचित् इह वृद्धा युवानः
शिशवः कपोताः खले यथामी युगपत्पतन्ति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति परे तु यद्यदाकांक्षितं योग्यं सन्नि
धानं प्रपद्यते तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते न यावच्चावत्वाक्यार्थबोधानन्तरं न पदैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः
एतेन मानवर्णाभिव्यंग्यः पदार्थस्फोटोपि निरस्तः ननु पूर्वसंस्कारसहितचरमवर्णोपलंभेन तद्धोजदेनैवोपपत्तिरिति इदं तु बोध्यं यत्र ह्य
रमित्यत्र नत्रपि पेहीत्यादिपुरस्यत्वावादेव शाब्दबोधः नत्वपिधानादिरूपार्थज्ञानात् परं तु त्वपदोपस्थिते सत्येव शाब्दबोधं प्रति हेतु
त्वात् किंच क्रियाकर्मपदानां तेनैव सह साकांक्षितत्वात् ननु क्रियापदं विना कथं बोधः स्यात् तथा अत्र इत्यादौ स्वहृदयमित्यादिपदा
ध्यारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः योग्यतां निर्वक्ति पदार्थ इति पदार्थे तत्र तद्धर्मवत्त्वं योग्यतापरिकीर्तिता एकपदार्थे
परपदार्थसंबोधो योग्यता इत्यर्थः तज्ज्ञानाभावाच्च वह्निना सिंचतीत्यादौ न शाब्दबोधः न चैतस्या योग्यताया ज्ञानं शाब्दबोधात्प्राक्
सर्वत्र न संभवति वाक्यार्थस्यापूर्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताज्ञानस्य सं
भवात् नव्यास्तु योग्यताज्ञानं न शाब्दबोधे कारणं वह्निना सिंचेत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेनैव प्रतिबंधाच्छा
ब्दबोधस्य तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यत्वज्ञानमात्रे प्रतिबंधकत्वात् तच्छाब्दबोधं प्रत्यपि प्रतिबंधकत्वं सिद्धं
योग्यताज्ञानविलंबाच्च शाब्दबोधविलंबो सिद्ध इत्याहुः आकांक्षां निर्वक्ति यत्पदेनेत्यादि यत्पदेन विना यस्यानन्वयभावकता भवेत् ये
न पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन सह तस्याकांक्षेत्यर्थः क्रियापदं विना कारकपदं नान्वयबोधं जनयतीति तेन तस्या
कांक्षा वस्तुतस्तु क्रियाकारकपदानां सन्निधानमात्रस्याचरितार्थं परं तु घटकर्मताबोधं प्रति घटपदोत्तरद्वितीयारूपाकांक्षाज्ञानं का
रणं तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ तु पुत्रेण सह राजपदस्य प्र
हायेनेवान्वयबोधः पुरुषेण सह तात्पर्यग्रहे तु तेन सहान्वयः स्यादेव तात्पर्यं निर्वक्ति वक्तुरिच्छेति आकांक्षावक्तुरिच्छा तु तात्पर्यं

गौरी

परिशिष्टीर्त्तिं यदि तात्पर्यज्ञानं कारणं न स्यात्तदा सैंधवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्यापि बोधो न स्यात् न च तात्पर्यग्राहककारणं प्रकरणादीनां शाब्दबोधकारणत्वमस्त्विति वाच्यं तेषामननुगमात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात्कारणमस्तु इत्थं च वेदस्थलेपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते न च तत्राध्यापकतात्पर्यज्ञानं कारणमिति वाच्यं सर्गादावध्यापकाभावात् न च प्रलय एव नास्ति कुतः सर्गादिरिति वाच्यं प्रलयस्यागमप्रतिपाद्यत्वात् इत्थं च शुकवाक्येपीश्वरतात्पर्यज्ञानं कारणं विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं शाब्दबोधकारणं अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणं तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः वेदे त्वनादिमीमांसापरिशोधिततर्केणार्थावधारणमित्याहुः पूर्वमनुभवस्मरणभेदाद्बुद्धिर्द्विविधेत्युक्तं तत्रानुभवप्रकारा न्दर्शिताः सुगमतया स्मरणं न दर्शितं तत्र हि पूर्वानुभवः कारणं अत्र केचित् अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेन अन्यथा स्मरणान्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात् मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः तत्र यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट सकलविषयकस्मरणं तु माभूत् तत्र फलसंस्कारनाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यं तथा च पुनः क्रमिकस्मरणानुपपत्तिः न च [illegible] पुनःस्मरणाद्दृढतरसंस्कारानुपपत्तिः झटित्युद्बोधकसमवधानस्य पदार्थत्वात् न च विनिगमनाविरहादेव हानत्वेनापि [illegible] इति वाच्यं विशेषधर्मस्य व्यभिचारज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात् कथमन्यथा दण्डस्य घटं प्रति द्रव्यत्वेन रूपेण न [illegible]णत्वं [illegible] आन्तरालिकस्मरणानां संस्कारनाशकत्वसंशयाद्व्यभिचारसंशय इति वाच्यं अनेन संस्कारनाशकत्व[illegible]न्तरस्मरणस्य च संस्कारनाशकत्वकल्पने न व्यभिचारसंशयाभावात् इदानीं क्रमप्राप्तं मनो निरूपयति साक्षात्कार इति [illegible]साक्षात्कारे सुखादीनां कारणं मन उच्यते एतेन मनसि प्रमाणं दर्शितं तथा हि सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारादिवदित्यनुमानेन करणस्य मनसः सिद्धेः न चैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यं लाघवादेकस्यैव सकलसाक्षात्कारकरणतयासिद्धेः एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनःसिद्धिर्बोध्या मनसोऽणुत्वे प्रमाणमाह अयौगपद्यादिति अयौगपद्याज्ज्ञानानां तस्याणुत्वं सिध्यति ज्ञानानां चाक्षुषरासनादीनां यौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धं तत्र नानेन्द्रियाणां सत्यपि विषयसन्निधाने यत्सम्बन्धादेकेनेन्द्रियेण ज्ञानमुत्पद्यते यदसम्बन्धाच्चापरेण ज्ञानं नोत्पद्यते तन्मनः विभुत्वे चासन्निधानं संभवतीति न विभुर्मनः न च तदानीमदृष्टविशेषोद्बोधविलम्बादेव न ज्ञानविलम्ब इति वाच्यं तथा च सति चक्षुरादीनामप्यकल्पनापत्तेः न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमेकदा नानेन्द्रियजज्ञानमिति वाच्यं मनसोऽतिलाघवात् झटिति नानेन्द्रियसम्बन्धान्नानाज्ञानोत्पत्त्या उत्पलशतपत्रभेदादिव यौगपद्यप्रत्ययभ्रान्तत्वात् न च मनसः संकोचविकासशालित्वादुभयोपपत्तिरस्त्विति वाच्यं नानावयवतन्नाशादिकल्पनागौरवात् लाघवान्निरवयवस्याणुरूपस्यैव मनसः कल्पनादिति संक्षेपः इति द्रव्यपदार्थव्याख्यानं द्रव्याणि निरूप्य गुणान्निरूपयति अथ [illegible] अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः गुणत्वजातौ किं मानमिति चेत् इदं द्रव्यं कर्मणि सामान्यवति या कारणता सा किंचिद्धर्मावच्छिन्ना निरवच्छिन्नकारणताया असम्भवात् न हि द्रव्यत्वादिकं सत्तादिकं वा तदवच्छेदिका न्यूनाधिकदेशवृत्तित्वात् अतश्चतुर्विंशत्यनुगतैव वाच्या तदेव गुणत्वमिति द्रव्याश्रिता इति यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः तथापि द्रव्यत्वव्यापकताव

वच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः । भवति हि गुणत्वं द्रव्यत्वव्यापकतानवच्छेदकं न हि तत् चतुर्गुणानामिति द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं गगनादौ
द्रव्यकर्मणोरभावात् द्रव्यत्वसामान्यत्वं च न जातिरिति तन्निरासः । निर्गुण इति यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे कर्मान्यत्वे च सति निर्गुणत्वं बोध्यं ।
ज्ञात्वादीनां न सामान्यवत्त्वं कर्मणो न कर्मान्यत्वं द्रव्यस्य न निर्गुणत्वमिति न तत्रातिव्याप्तिः । निःक्रिया इति स्वरूपकथनं न तु लक्षणं गगनादावतिव्याप्तेः । मूर्त्तगुणा इति रूपं
रसस्पर्शगन्धपरत्वमपरत्वं द्रवत्वस्नेहवेगाख्या मता मूर्त्तगुणा अमी । धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च एते मूर्त्तगुणाः सर्वे विद्वद्भिः परिकीर्त्तिताः । संख्यादिर्
विभागान्त उभयेषां गुणो मतः । संयोगश्च विभागश्च संख्या द्वित्वादिका तथा । द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः । वेग इति स्थितिस्थापकोऽपि लक्षणीयः लक्षणं तु तावदमूर्त्त
मूर्त्तवृत्तिन वर्त्तन्त इत्यर्थः । उभयेषामिति मूर्त्तामूर्त्तगुणा इत्यर्थः । मूर्त्तवृत्तित्वे सति द्रव्यवृत्तिद्विगुणत्वव्याप्यजातिमत्त्वं संख्यात्वादिकमादाय लक्षणसमन्वयः । अनेके
काश्रिता इति संयोगविभागद्वित्वादीनि हि द्विष्ठानि त्रिचतुष्ठादिकं तु त्रिचतुरादिवृत्तीति बोध्यं । अतःशेषा इति अतःशेषा गुणाः सर्वे मता एकैकवृत्तयः । रूपरसगन्ध
स्पर्शैकत्वपरिमाणपृथक्त्वपरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः । बुद्ध्यादीति बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः । स्पर्शान्ता इति रूपरसगन्धस्पर्शा इत्यर्थः । इमे द्रव्यत्वेन वैशे-
षिका इति विशेषपदवैशेषिकाः । स्पर्शादिक संख्यादिरिति संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः । संख्यापरि-
माणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः । संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः । बाह्यैकैकेन्द्रियग्राह्या गुरु-
त्वादृष्टभावना अतीन्द्रिया । द्वीन्द्रियमिति चक्षुस्त्वचापि ग्रहणयोग्यत्वात् । बाह्येति रूपादीनां चक्षुरादिग्राह्यत्वात् विभूनामिति विभूनां तु ये स्यु-
र्वैशेषिका गुणाः । अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना इत्यर्थः ; शब्दा । अकारणेति कारणगुणेन कार्यगु-
णा उत्पद्यन्ते कारणपूर्वकारूपादयोऽवस्यते बुद्ध्यादयस्तु न तादृशा आत्मादेः कारणाभावात् अपाकजास्त्विति अपाकजोष्णस्पर्शान्ता द्रवत्वं च तथाविधं पा-
कजरूपादीनां कारणगुणपूर्वकत्वाभावादपाकजा इत्युक्तं तथाविधमपाकजं स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकं स्थितिस्थापक इत्येते स्युः कारणगु-
णोद्भवाः । कारणगुणोद्भवा इति न त्वेकत्वमपि बोध्यं संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः । कर्मजा इति कर्मजत्वं यद्यपि न साधर्म्यं घटादावतिव्या-
प्तेः संयोगजाः संयोगोत्पन्नाश्च तथापि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यं एवमन्यत्रापि क्वचिद्धेतुः स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके भ-
वेदसमवायित्वमथ वैशेषिके गुणे आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा । द्विधैव कारणत्वं स्यादथ प्रादेशि-
को भवेत् वैशेषिको विभुगुणः संयोगादिद्वयं तथा । भवेदसमवायित्वमिति घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवति एव
कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वं शब्दस्यापि द्वितीयशब्दं प्रति तथात्वमिति बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भा-
वः । द्विधैवेति असमवायिकारणत्वं निमित्तकारणत्वं च तथाहि उष्णस्पर्शोऽसमवायी पाकजे निमित्तं गुरुत्वं गुरुत्वपतनयोरसमवायि अभि-
घाते निमित्तं वेगो वेगस्पन्दयोरसमवायी अभिघाते निमित्तं द्रवत्वं द्रवत्वस्यन्दयोरसमवायि संग्रहे निमित्तं भेरीदण्डसंयोगः शब्दे निमित्तं भेर्याकाश-
संयोगोऽसमवायी वंशदलद्वयविभागः शब्दे निमित्तं वंशदलाकाशविभागोऽसमवायीति प्रादेशिकोऽव्याप्यवृत्तिः । चक्षुरिति चक्षुर्ग्राह्यं भवेद्
रूपं द्रव्यादेरुपलंभकं चक्षुर्मात्रग्राह्यो विशेषगुणो रूपमित्यर्थः । एवमग्रेऽपि रूपत्वजातिस्तु घटं न दत्ता सिद्धा रूपशब्दोल्लेखनी प्रतीतिर्नास्तीति चेन्न मास्तु रूप-
शब्दप्रयोगः तथापि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव रूपशब्दप्रयोगोऽपि नीलो वर्णः पीतो वर्ण इति वर्णपदेन तु विनील-
प्रतीतिरस्त्येव एवं नीलत्वादिकमपि प्रत्यक्षसिद्धं न चैकैक एव नीलरूपादिव्यक्तिरयं इत्येकवृत्तित्वात् नीलत्वादिकं न जातिरिति वाच्यं नीलो
नष्टो रक्तोऽउत्पन्न इत्यादिप्रतीतेः नीलादेरनित्यात् विनाशव्याप्तिः तेषां नानात्वात् अन्यथा एकनीलनाशे जगदनीलमापद्येत न च नीलस-
मवायस्य समवाययोरेव विनाशोत्पादविषयकोऽयं प्रत्यय इति वाच्यं प्रत्यक्षत्वस्य समवायात्वेनोक्तत्वात् न च समवाय नील इति प्रत्ययस्त्वा अपा,
तवैकमिति वाच्यं प्रत्यक्षस्य तज्जातीयत्वविषयकत्वात् सेयं गुर्जरीति वदाधवप्रत्यक्षबाधित अन्यथा घटादीनामप्येकत्वप्रसंगात् उत्पाद

विनापाबुद्धेः समवायावलंबनस्योपपन्नत्वादिति एतेन रसादिकं व्याख्यातं द्रव्यादेरुपलंभकं उपलंभः कारणं इदमेव विवृणोति चक्षुष इति चक्षुषः सहकारिस्य
कुंकुमादिकमनेकधा द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षप्रतिउद्भूतरूपं कारणं शुक्लेति तद्रूपं शुक्लपीतरक्तकपिलनीलकृष्णकर्पूरादिभेदेनानेक
प्रकारकं भवति ननु कुसुमे किं रूपं मतिरिक्तं रूपं इत्थं नीलपीताद्यारब्धो ऽवयवी न तावन्नीलरूपः अप्रत्यक्षत्वप्रसंगात् नापि व्याप्यवृत्तिनीलादिरूपमुपपद्यते
पीतावच्छेदेनापि नीलोपलब्धिप्रसंगात् नाप्यव्याप्यवृत्ति नीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वविरोधात् तस्मान्नानाजातीयरूपैर
वयविनि विजातीयं चित्ररूपमारभ्यते अत एवैकं चित्रमित्यनुभवोपि नानारूपकल्पने गौरवात् इत्थं च नीलादीनां पीताद्यारंभे प्रतिबंधकत्वकल्पनादव
यविनि न पीताद्युत्पत्तिः एतेन स्पर्शोपि व्याख्यातः रसादिकमपि नाव्याप्यवृत्ति किंतु नानाजातीयरसैरवयवैरारब्धो ऽवयविनि रसाभावेपि न क्षतिः न चारस
तयाऽवयवरस एव गृह्यते रसनेंद्रियादीनां द्रव्यग्रहे सामर्थ्याभावात् अवयविनि रसोपि तत्तेरभावात् जलादीति जलादिपरमाणौ नित्यमन्यत्रा
हेतुकं जलपरमाणोः तेजःपरमाणोश्च रूपं नित्यं पृथिवीपरमाणुरूपं त्वनित्यं तत्र पाकेन रूपांतरोत्पत्तेः नहि परस्य पाकानंतरं तेद्द्वयवो ऽपक्व
उपलभ्यते नहि रक्तकपालस्य कपालिका नीला भवति एवं क्रमेण परमाणौ पाकसिद्धिः अन्यज्जलतेजःपरमाणुरूपभिन्नरूपं सहेतुकं जन्य
रसं निरूपयति रसस्त्विति रसस्तु रसनाग्राह्यो मधुरादिरनेकधा सहकारीति रासनत्वेन रसः कारणमित्यर्थः सहकारिरसनाया नित्यतादि च
पूर्ववत् इति पूर्ववदिति जलपरमाणो रसो नित्यः अन्यः सर्वोप्यनित्यः गंधं निरूपयति घ्राणग्राह्य इति घ्राणग्राह्यो भवेद्गंधो घ्राणस्यैवोपलंभ
कः सौरभं चासौरभं च तद्धि पार्थिवीकीर्तितं उपलंभक इति घ्राणजन्यत्वेन कारणमित्यर्थः सर्वोपि गंधो ऽनित्य एव स्पर्शं निरूपयति स्पर्शस्त्विति
पृथग्राह्यस्त्वचः स्यादुपकारकः स्पर्श इति त्वचः स्यादुपकारक इति स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः अनुष्णाशीतेति अनुष्णाशीतशीतोष्णभेदात्स
त्रिविधो मतः पृथिव्यां वायोश्च स्पर्शोनुष्णाशीतः जलस्य शीतः तेजस उष्णः काठिन्यादीति काठिन्यादिक्षितावेव नित्यत्वादि च पूर्ववत् एतेषां पाकज
त्वेतु क्षितौ नान्यत्र कुत्रचित् कठिनस्तु कुमारस्पर्शो पृथिव्यामेवेत्यर्थः कठिनत्वादिकं तु संयोगगतो जातिविशेषः चक्षुर्ग्राह्यत्वापत्तेः पूर्ववदिति
जलतेजोवायुपरमाणुस्पर्शो नित्यास्तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः एतेषां रूपरसगंधस्पर्शानां नान्यत्रेति पृथिव्यां हि रूपरसगंधस्पर्शपरावृत्तिः पा
कसंयोगादुपलभ्यते नहि पाकतथाविधाय माने जले रूपादिकं परावर्तते नीरसौरभ्यमपि पंचावयवव्यतिरेकाभ्यामुपाधेरेव निर्णीयते पवनपृथिव्योः
पीतस्पर्शादिवत् तत्रापि पृथिव्याः पिठरपाकवादिका याइति वैशेषिकावदंति ते प्राय समवायाः अवयविनावष्टब्धेष्ववयवेषु पाको न संभवति
परं तु वह्निसंयोगे नावयविषु विनष्टेषु स्वतंत्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयोगाद् [illegible]कादिक्रमेण पुनर्महावयविपर्यंतमुत्पत्तिः तेज
सामतिशयितवेगवशात् पूर्वव्यूहनाशोपि इति वदंति तेन सर्वत्र इति अथ द्व्यणुकादि विनाशमारभ्य कतिभिः क्षणैः पुनरुत्पन्नरूपादिमद्भवति
इति शिष्यबुद्धिवैशद्याय प्रक्रिया तत्र विभागजविभागानंगीकारे नवक्षणा तदंगीकारे [illegible] सापेक्षो विभागजविभाग उपेतनिरपेक्षः स्यात्तदा त्वेकर्मत्व
तत्र यदि द्व्यारंभकसंयोगविनाशविशिष्टकालमपेक्ष्य विभागजविभागः स्यात्तदा दशक्षणा अथ द्रव्यविनाशविशिष्टकालमपेक्षते तेन तदैकादशक्षणा न
थाहि वह्निसंयोगात्परमाणौ कर्म ततः परमाण्वंतरेण विभागस्ततः आरंभकसंयोगनाशस्ततो द्व्यणुकनाशस्ततः परमाणौ श्यामादिनाशस्ततो रक्ताद्युत्पत्तिस्त
तो द्व्यारंभानुगुणक्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्तत आरंभकसंयोगस्ततो द्व्यणुकोत्पत्तिस्ततो रूपाद्युत्पत्तिः ननु श्यामादीनां नाशक्षणे
रक्तोत्पत्तेर्वा परमाणौ द्व्यारंभानुगुणक्रिया स्यादिति चेन्न अग्निसंयुक्ते परमाणौ पत्कर्म तद्धि नाशमंतरेण गुणोत्पत्तिमंतरेण च न तत्र परमाणौ क्रियांतराभावात्
कर्मवति कर्मांतरानुत्पत्तेः निर्गुणे द्व्यानुगुणक्रियानुत्पत्तेश्च न च श्यामपरमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न पूर्वरूपादिध्वंसस्यापि हे
पातरहेतुत्वात् अथ दशक्षणा सा चारंभकसंयोगविनाशविशिष्टकालमपेक्ष्य तद्विभागेन विभागजनने सति स्यात् तथाहि वह्निसंयोगाद्व्यणुकारंभके
परमाणौ कर्म ततो विभागस्ततो आरंभकसंयोगनाशस्ततो द्व्यणुकादिनाश विभागजविभागो ततः श्यामनाश पूर्वसंयोगनाशो ततो रक्तोत्पत्तिरुत्तरसंयोगो
ततो वह्निनोदनाजन्यपरमाणुकर्मणो नाशस्ततो ऽदृष्टवदात्मसंयोगाद्व्यारंभानुगुणक्रिया ततो विभागस्ततः पूर्वसंयोगनाशस्तत आरंभकसंयोगस्

मूं

नाशस्तदुत्पत्तिः । अपरक्तोत्पत्तिः । अथैकादशक्षणा यथाहि वह्निसंयोगात्परमाणौ कर्म ततो विभागस्ततो द्व्यणुकारंभकसंयोगनाशस्ततो द्व्यणुकनाशस्ततो द्व्यणुकनाशाद्वि-
भागजविभागस्य विभागजविभागः परमाणौ ततः पूर्वसंयोगनाशः रक्तोत्पत्तिर्नवद्रव्यारंभकसंयोगस्ततः परमाणुकर्मनाशस्ततो द्व्यणुकोत्पत्तिर्वा द्व्यणुकनाशस्ततो द्व्यणुकनाशे वि-
नो विभागस्ततः पूर्वसंयोगनाशस्ततः आरंभकसंयोगस्ततो द्व्यणुकोत्पत्तिः । अपरक्तोत्पत्तिः । मध्यमपाक्षे चदेकस्यादग्निसंयोगात् तेषां तत्पन्नात्पन्नादौ नावत्काल मेकस्यापरे ।
स्थिरत्वात् । किंच यदि उत्पादकोनाशकालदानकूपादावग्निनाशे निरूपयिरपरमाणोः स्यात् नापाकः द्व्यणुकादावसंद्रारकोत्पत्तौ नदग्निनाशे रक्तोत्पत्तिः स्यात् परमाणौ
तरकर्मचिंतनः त्वचमादित्पत्तिः । यथाहि एकत्र परमाणौ कर्म ततो विभागस्ततश्चारंभकसंयोगनाशायपरमाणवेन्तरकर्मणि ततो द्व्यणुकनाशः परमाणौ तरके-
र्मज विभागस्तदेक काल : अपद्व्यणुकोत्पत्तिः । अपरक्तोत्पत्तिरिति पंचमक्षणम् द्व्यणुकनाशसमकालं परमाण्वंतरे कर्मचिंतनात्र द्वे गुणोत्पत्तिः । यथाहि परमाणौ
कर्म ततः परमाण्वंतरविभागः ततश्चारंभकसंयोगनाशः अपद्व्यणुकनाशः परमाण्वंतरकर्मणि अपद्व्यणुकनाशः परमाण्वंतरकर्मजविभागः रक्तोत्पत्तिः
त्ति : परमाण्वंतरे पूर्वसंयोगनाशस्ततः परमाण्वंतरसंयोगः ततो द्व्यणुकोत्पत्तिः । अपरक्तोत्पत्तिरिति । एवं श्यामनाशक्षणे परमाण्वंतरकर्मचिंतनात्पन्न-
तम तथाहि परमाणौ कर्म ततः परमाण्वंतरेण विभागस्ततश्चारंभकसंयोगनाशस्ततो द्व्यणुकनाशस्ततः श्यामादिनाशः परमाण्वंतरे कर्म ततो रक्तोत्पत्ति
विभागो ततः संयोगनाशस्ततः उत्तरसंयोगस्ततो द्व्यणुकोत्पत्तिस्ततो रक्तोत्पत्तिः । रक्तोत्पत्तिसमकालं परमाण्वंतरे कर्मचिंतनाद्द्वे क्षणा इति नयनैयायिका-
नां तु घटादावपीष्यते नैयायिकानां मते घटकादावपि विलक्षणपाको भवति । तेषामयमाशयः । अवयविनाशस्याहिं ढत्वाद्वह्नेः सूक्ष्मो वयवेरतः प्रविष्टस्य
अवयवेषु वह्नेः पाकोन विरुध्यते अनंतावयवितन्नाशकल्पने गौरवं च । इत्यं च सोयं घट इत्यादि प्रत्यभिज्ञा यत्र तु प्रत्यभिज्ञा तत्राव विनाशोपि स्वी-
क्रियते संख्यां निरूपयति गणनेति न अपि परमाणौ स्यात्पाको वैशेषिकैर्मते नैयायिकानां तन्मते घटकादावपीष्यते गणनाव्यवहारहेतुः संख्या
विधीयते नित्येषु नित्यमेकत्वमनित्ये नित्यमिष्यते द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः । अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः । अपेक्षाबुद्धि-
नाशाच्च नेशमायान्ति निरूपिताः । गणनाव्यवहारासाधारणकारणं संख्येत्यर्थः । नित्येषु नित्यमिति नित्येषु परमाण्वादिष्वेकत्वं नित्यं अनित्ये घटादाव-
नित्यमित्यर्थः । द्वित्वादयइति द्वित्वादयो व्यासज्यवृत्तिसंख्या अपेक्षाबुद्धिजन्याः । अनेकेति यद्यपि द्वित्वादिसंबंधः प्रत्येकं घटादावपि वर्त्तते तथापि ए-
कोद्वाविति प्रत्ययाभावादेकोनद्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां च व्यासज्यवृत्तित्वम् । कुत्र न संबंधः । अनेकाश्रयोस्तु च यते अपेक्षाबुद्धिनाशाद्धनेशमायान्ति
निरूपिताः । अयमयमपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकात्मकं ततो द्वित्वविशिष्टप्रत्यक्षं अपेक्षाबुद्धिनाशश्च ततो
द्वित्वादिनाश इति यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्य-
ते अन्यथा निर्विकल्पकाले अपेक्षाबुद्धिनाशात् तेनरं द्वित्वस्यैव नाशः स्यात् द्वित्वप्रत्यक्षं न तदानीं विषयाभावात् विषयमानस्यैव च प्रत्यक्षे तु हेतुत्वान्न जनको
पगमात् तस्माद्द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धिनाशकं कल्प्यते न चापेक्षाबुद्धिनाशात्कथं द्वित्वनाश इति वाच्यं कालांतरे द्वित्वप्रत्यक्षाभावादपेक्षाबु-
द्धिसत्त्वकालेऽप्युत्पत्तेः तावत् । अत एव तेन्तु कुवीयापेक्षाबुद्धिजन्यद्वित्वादि कतेऽनैव दृश्यते न चापेक्षाबुद्धिर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यं लाघ-
वेन द्वित्वप्रतिकारणत्वस्यैवोचितत्वात् अतींद्रियद्व्यणुकादावपेक्षाबुद्धियोगिनां सर्गादिकालीनपरमाण्वादावीश्वरापेक्षाबुद्धिर्द्व्यणुकादावनीनयोगि-
र्थः परिमाणं निरूपयति परिमाणमिति परिमाणमवेन्मानव्यवहारस्यकारणं अणुदीर्घमहद्ध्रस्वमितितद्भेद ईरितः । तच्चतुर्विधं अणुमह-
द्दीर्घह्रस्वचेतत्परिमाणं अनित्यमिति अनित्येतदनित्यस्या नित्ये नित्यमितीर्यते नित्यमित्यत्र परिमाणमनुवर्तते जायते इत्यत्रापि परिमा-
णमनुवर्तते अनित्यमिति पूर्वेणान्वीयते तथा चानित्यपरिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः तत्र संख्याजन्यमुदाहरति द्व्यणुका-
दाविति अनित्ये द्व्यणुकादौ तत्संख्याजन्यमुदाहृतं द्व्यणुकपरमाणुपरिमाणं प्रतिपरमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणं परिमा-



संख्यातः परिमाणाच्च प्रचयादपि जायते ॥२

णुस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । द्व्यणुकस्याणुपरिमाणं तु परमाणुपरिमाणापेक्षयोत्कृष्टं त्रसरेणुपरिमाणं तु न सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणं प्रति द्व्यणुके त्रित्वसंख्या त्रसरेणुपरिमाणस्य असमवायिकारणमित्यर्थः । परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणं घटादौ तु परिमाणजमुच्यते । घटादिपरिमाणं तूलकादौ न्यायप्रचयनाशतः नाशादिति अर्थात् परिमाणस्य पृथक्त्वं निरूपयति संख्यावदिति । संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणं । पृथक्प्रत्ययासाधारणकारणं पृथक्त्वं नित्यतादिकं संख्यावत् यथा हि नित्येष्वेकत्वं नित्यं अनित्येषु नित्यम् आश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपीत्यर्थः । नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते न तु पृथक्त्वं गुणान्तरं स्वीक्रियते न च पृथक्त्वमेवास्तु तत्वन्योन्याभावइति वाच्यं रूपं न घट इति प्रतीत्यभावापत्तेः । नहि रूपे घटावधिकं पृथक्त्वगुणान्तरमस्ति न वा घटे घटावधिकं पृथक्त्वमस्ति येन परंपरासंबंधः कल्प्यत इत्यत आह अन्योन्याभावइति अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते अस्मात्पृथगिदं भिन्नप्रतीतिर्हि विलक्षणा न च पञ्चमी वैलक्षण्यमेव नेत्वर्थं वैलक्षण्यमिति चेत् विनार्थभेदं घटात्पृथगिति विवेचने घटो नेत्यत्रापि पंचमी प्रयोगात् तस्माद्घटाद्यर्थयोगात्पञ्चमी नेत्यर्थः तत्पृथक्त्वमन्योन्याभावतः भिन्नं गुणान्तरं कल्प्यत इति संयोगं निरूपयति अप्राप्तयोरिति अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः तथोभयस्पन्दजन्यो भवेत्संयोगजोऽपरः आदिमः श्येनशैलादिसंयोगः परिकीर्तितः मेषयोः सन्निपातो यः स द्वितीय उदाहृतः कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः न विभज्यते कीर्तित इति एषः संयोगः सन्निपात उभयकर्मजः तृतीय इति तृतीयः स्यात्कर्मजोऽपि द्विविधः परिकीर्तितः अभिघातो नोदनं च शब्दहेतुरिहादिमः संयोगजसंयोग इत्यर्थः तृतीयस्यादिति पूर्वेणान्वितं आदिम अभिघाताख्यः द्वितीयो नोदनाख्यस्संयोगः विभागं निरूपयति विभक्तप्रत्ययासाधारणकारणं विभाग इति पादहेतुस्तृतीयः स्याद्विभागोऽपि त्रिधा भवेत् एककर्मेति एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवः परः विभागस्तु तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् उदाहरणं श्येनशैलविभागादिकं पूर्ववद्बोध्यं हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः तृतीयविभागः कारणमात्रविभागजन्यकारणाकारणविभागजन्यश्चेति । आद्यस्तु यथा कपाले कर्म ततः कपालद्वयविभागस्ततो घटारम्भकसंयोगनाशस्ततो घटनाशस्ततस्तेनैव कपालविभागेन सकर्मणः कपालविभागस्य देशान्तरविभागो जन्यते ततो देशान्तरसंयोगस्ततो कर्मनाश इति न चैतेनैव कर्मणा कथं देशान्तरविभागो न जन्यत इति वाच्यं एकस्य कर्मण आरम्भकसंयोगप्रतिद्वन्द्वि विभागजनकत्वस्य अनारम्भकसंयोगप्रतिद्वन्द्वि विभागजनकत्वस्य च विरोधात् अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्माद्यदि द्रव्यानारम्भकसंयोगप्रतिद्वन्द्वि विभागं जनयेत् तदारम्भकसंयोगप्रतिद्वन्द्वि विभागं न जनयेत् न च कारणविभागेनैव पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यं आरम्भकसंयोगप्रतिद्वन्द्वि विभागतोऽवयवस्य प्रतिद्वन्द्वि देशान्तरविभागासम्भवात् द्वितीयस्तु यथा हस्तक्रियया हस्ततरुविभागस्तत्र शरीरेऽपि विभक्तप्रत्ययो भवति ततः शरीरतरुविभागो हस्तक्रियया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्ति अवयविकर्मणो यावदवयवकर्मनियतत्वात् हस्तस्तु कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति अत एव विभागोत्पत्त्यनन्तरं अन्यथा शरीरे विभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति परापरव्यवहारनिमित्ते परापरत्वे निरूपयति परत्वं चापरत्वं चेति दैशिकमिति परत्वं चापरत्वं च द्विविधं परिकीर्तितं दैशिकं कालिकं चापि मूर्त्त एव तु दैशिकं दैशिकपरत्वं बहुतरसंयोगान्तरितत्वज्ञानादुत्पद्यते एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते अत्रावधित्वार्थं तृतीयापेक्षा यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः पाटलिपुत्रात्कुरुक्षेत्रं प्रयागात्परे इति तयोर्दैशिकपरत्वापरत्वयोः असमवायी असमवायिकारणं तदाश्रये दैशिकपरत्वापरत्वाश्रये दिवाकरेति परत्वस्य सूर्यसंयोगभूयस्त्वज्ञानतो भवेत् अपरत्वं तदल्पत्वबुद्धितः स्यादिति इति तयोरसमवायी तु दिक्

संयोगस्तदाश्रये दिवाकरपरिस्पन्दभूयस्त्वज्ञानं ततो भवेत् परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः अपेक्षाबुद्धिनाशेन ना
शस्तेषामुदाहृतः अत्र परत्वमपरत्वं कालिकं ग्राह्यं यस्य सूर्यपरिस्पन्दो धिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः कालिकपरत्वापरत्वे जन्यद्रव्य एव तत्र कालिकापर
त्वापरत्वयोः एवं कालिकदैशिकपरत्वापरत्वानन्तरं क्रमप्राप्तां बुद्धिं निरूपयति बुद्धिरिति बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः अथावशिष्टो व्यापारः प्रका
रः परिदर्श्यते अप्रमा च प्रमा चेव ज्ञानं द्विविधमिष्यते अप्रमां निरूपयति तच्छून्ये इति तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता तत्प्रपञ्चो विपर्यासः संशया
यादिः प्रकीर्तितः तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः तत्प्रपञ्चेति अप्रमाप्रपञ्चः आद्य इति आद्यो देहे आत्मबुद्धिः शङ्खादौ पीततामतिः भवेन्नि
श्चयरूपा या संशयोथ प्रदर्श्यते विपर्यय इत्यर्थः शरीरादौ निश्चयरूपा या देहत्वप्रकारकं ज्ञानं गौरोहमित्याकारकं एवं शङ्खादौ पीतः शङ्ख इत्याकारकं य
ज्ज्ञानं निश्चयरूपं तद् भ्रम इति किंस्विदिति किंस्विन्नरो वा स्थाणुर्वेत्यादि बुद्धिस्तु संशयः तदभावेति तदभाववत्प्रकाराधीनतत्प्रकारस्तु
निर्णयः तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चयः संशयं लक्षयति संशय इति समानधर्मधीः स्यादेकधर्मिविभावभावयोः एकधर्मिकभावाभावप्रकार विरुद्ध
कं ज्ञानं संशय इत्यर्थः साधारणेति साधारणादिधर्मस्य ज्ञानं संशयकारणं उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणं यथा चैतस्त्वं स्थाणुत्वं तदभा
वसाधारणं ज्ञात्वा अयं स्थाणुर्न वेति संदिग्धे एवमसाधारणधर्मज्ञानं कारणं यथा शब्दत्वं नित्यानित्यावृत्ति शब्दे गृहीत्वा शब्दो नित्यो न वेति संदिग्धे विप्र
तिपत्तिस्तु शब्दो नित्यो न वेति शब्दात्मिका न संशयकारणं शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात् किन्तु शब्दे कोटिद्वयज्ञानं जन्यते संशयस्तु मा
नसत्वेनेति एवं ज्ञाने प्रामाण्यसंशयादिद्विषयसंशयः एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यं किन्तु संशये धर्मिज्ञानं धर्मेन्द्रियसन्निकर्षो वा कार
णमिति दोषइति दोषोऽप्रमाजनकः प्रमायास्तु गुणो भवेत् पित्तदूरत्वादिरूपो दोषो नानाविधो मतः प्रत्यक्षे तु विशेष्येण विशेषणवता समं सन्निकर्षो
गुणस्तु स्यादथ त्वनुमितौ पुनः पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः शाब्दबोधे योग्यतायास्तात्पर्यस्याथ
वाप्रमा गुणः स्यादप्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तत्र पित्तादिदोषस्य नैकरूपतान्नैवाकारणत्वमन्वेया
व्यतिरेकादेव सिद्धं गुणस्य प्रमाजनकत्वं त्वनुमानसिद्धं यथा प्रमाज्ञानं सामान्यकारणभिन्नकारणजन्या जन्यज्ञानत्वात् अप्रमावत् न च दोषाभाव एव कारणमस्ति
ति वाच्यं पीतशङ्खभ्रमस्थलेपि पित्तरूपदोषसत्त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहाद्दोषाभावकारणत्वस्यापेक्षया गुणकारणताया
न्याय्यत्वाच्च न च गुणस्य कारणत्वेपि पित्तप्रतिबन्धकत्वेन स्वतः ज्ञानमतः पित्तादिदोषाणामभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणकल्पनेनेति
वाच्यं तथापि अन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः एवं च प्रमां प्रति गुणाभावकारणमित्यस्यापि सत्त्वे चत्वात् तत्र दोषाः कटुत्वाकाशत्वाद्यामोहपि
त्तं तिक्तपीततादिभ्रमे पीतदोषः केचिच्चन्द्रादेः स्वल्पपरिमाणग्रहे दूरत्वं दोषः केचिद्धेतोर्भ्रमः मण्डूकत्वं साजनद्रव्यं दोषाश्च नन्तगता एवं भ्रा
न्तिजनका इत्यर्थः अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्षेत्विति प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः अत्र तु सि
तासाध्यवद्वृत्तिः साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः एवमग्रेपि ग्राह्यं प्रमां निरूपयति अभिन्नमिति अथ वा तत्प्रकारं यज्ज्ञानं तद्धि प्रोच्यते तत्प्रमा सा प्रमाणं
पि भ्रमः स्यान्निर्विकल्पकं न तु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं प्रमेत्यर्थः एवं सति निर्विकल्पकं प्रमा न स्यात् तत्प्रकारकत्वाभावात्
अतआह न प्रमेति ननु वृक्षे कपिसंयोगज्ञानाभावो वृक्षे देनसंयोगस्याग्रगगनस्य साधर्म्येन स्यात् तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वा
च्यं तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानमेव न स्यात् तत्र संयोगाऽभ्रमत्वात् लक्षणस्याननुगमलक्षणानुगमेपि न क्षतिः प्रमात्वमिति प्रकारता
दिरूपं वृत्ति संबन्धानवगाहि तत् प्रमात्वेन स्वतो ग्राह्यं संशयानुपपत्तितः मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति तन्मते गुरूणां मते ज्ञानस्य स्वप्रकाश
त्वात् ज्ञानप्रामाण्यं तेनैव गृह्यत इति भाट्टानां मते तु ज्ञानमतीन्द्रियं ज्ञानजन्यज्ञातता प्रत्यक्षा तया च ज्ञानमनुमीयते मुरारिमिश्राणां मते तु अनुव्यव
सायेन ज्ञानं गृह्यते सर्वेषामपि मते पि तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते विषयनिरूप्यं हि ज्ञानं अतो ज्ञानवित्तिवेद्यो विषयः तन्मते दूषय
ति न स्वतो ग्राह्यमिति संशयेति यदि ज्ञानप्रामाण्यं स्वतो ग्राह्यं स्यात्तदा तदनभ्यासदशायां ज्ञानप्रामाण्यसंशयो न स्यात् तत्र हि यदि ज्ञाने ज्ञाते तदा



निर्विकल्पकं

त्वन्मते प्रामाण्यं ज्ञानमेवेति कथं संशयः यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः तस्माज्ज्ञाने प्रामाण्यमनुमेयं तथाहि इदं ज्ञानं प्रमा संवादिप्रवृत्ति जनकत्वात् इदं पृथिवीत्वप्रकारकज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात् एवमिदं जलत्वप्रकारकज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात् ननु किं तु ज्ञानं कथं ज्ञातमिति वाच्यं तत्प्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गन्धग्रहेण गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानुरोधात् न तु सर्वेषां ज्ञानानां यथार्थत्वात् भ्रमालक्षणेन हि विशेष्यकत्वविशेषणमव्यर्थं न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमं विना न स्यात् न च मते भ्रमस्याभावादिति वाच्यं तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्यैव हेतुत्वात् सत्यरजतस्थलेऽनु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणमस्तु कानत्रापि भेदाग्रह एव कारणमिति न चान्यथाख्यातिः संभवति रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावाद्रङ्गे रजतबुद्धेरनुपपत्तिरिति चेत् न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य रजतसन्निकर्षस्याभावाद्रङ्गे रजतबुद्धेरनुपपत्तिरिति चेन्न हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात् न च संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ भेदाग्रहः कारणमिति वाच्यं लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् इत्थं च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेऽपि न क्षतिः फलमुखगौरवस्यादोषत्वात् किं च यत्र रङ्गरजतयोरिमे रङ्गरजते चेति ज्ञानं तत्र न कारणबाधोऽपि अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र पुरःपतिते प्रवृत्तिनिवृत्ती स्यातां रङ्गे रङ्गभेदाग्रहे रजते रजतभेदाग्रहे चान्यथाख्यातिमेयात् त्वन्मते रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य सत्त्वात् दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात् किं चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहादनुमितिर्निर्बाधा यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमवज्ज्ञानमनुमित्यनुरोधादापतितं सेयमुभयतःपाशा रज्जुः इत्थं चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणं रङ्गं रजततया जानामीत्यनुभवादिति संक्षेपः पूर्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दर्शित इत्यतस्तं दर्शयति व्यभिचारस्येति व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्त्तकः व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात्तदभावकारणं एवमन्वयव्यतिरेकाभ्यां सहचारस्यापि हेतुता भूयोदर्शनं तु न कारणं व्यभिचारास्फूर्त्तौ सकृद्दर्शनेऽपि क्वचिद्व्याप्तिग्रहात् क्वचिद्व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमुपयुज्यते यत्र भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षबाधकस्तर्कोऽपेक्षितः तथाहि वह्निविरहेऽपि धूमः स्यादिति यदा शङ्का भवति सा वह्निधूमयोः कार्यकारणभावस्य प्रतिसन्धानान्निवर्त्तते यद्ययं वह्निमान् न स्यात्तदा धूमवान् न स्यात् कारणं विना कार्यानुत्पत्तेः यदि च क्वचित्कारणं विनापि भविष्यति हेतुं विनैव भविष्यतीति तत्राप्याशङ्का भवति तदा व्याघातादयः स्मरणीयाः यदि कारणं विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमत उपादानं न स्यात् अत्र स्वत एव शङ्का नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचिच्छङ्कानिवर्त्तक इति इदानीमुपाधिं निरूपयति साध्यस्येति साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापक उपाधिरित्यर्थः ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वं नोपाधिः स्यात् तस्य साध्यव्यापकत्वाभावात् श्यामस्य काकादावपि सत्त्वात् एवं वायुः प्रत्यक्षः स्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात् प्रत्यक्षत्वस्यात्मादिषु सत्त्वात् तत्र च रूपाभावात् एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात् हि नाशित्वस्य प्रागभावेऽपि सत्त्वात् तत्र च भावत्वाभावादिति चेन्न यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नप्रत्यक्षत्वस्य व्यापकं उद्भूतरूपवत्त्वं बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकं भावत्वं एवं काकः श्यामो मित्रातनयत्वादित्यादावपि मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं सद्धेतौ तत्त्वे तादृशो धर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्याव्यापकं किंचित्स्यात् व्यभिचारिणि रूपाधिविकरणं यत्सोपाधिकरणं यश्चोपाधिस्तत्त्वं साध्यव्यभिचारनिरूपकमधिकरणं अतस्तदन्यतरत्वावच्छिन्नस्य साध्यव्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेः संभवतीति अत एव लक्ष्यमपि उपाधिस्वरूपमेतदेव

सारेणदर्शयति सर्वइति सर्वे साध्यसमानाधिकरणाः सदुपाधयः हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता स्वसाध्येति स्वमुपाधिः सं च साध्यं च स्वसाध्येन यो व्यभिचारीत्यर्थः उपाधेर्दूषकताबीजमाह व्यभिचारस्येति व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनं शाब्दोपमानयोर्नैव यत्र प्रामाण्यमिष्यते उपाधिव्यभिचारेण साध्यव्यभिचारानुमानमुपाधिः प्रयोजनमित्यर्थः तथाहि यत्र सद्धेतु साध्यव्यापकं तत्र सद्धेतोपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वादिति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यंभावात् यत्र किंचिद्धर्मावच्छिन्नसाध्यव्यापक उपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानं स्यपाको मित्रातनयत्वादित्यादौ मित्रातनयत्वस्य श्यामत्वव्यभिचारः मित्रातनयत्वे शाकपाकजत्वव्यभिचारित्वादिति बाधानुमितिप्रतिबन्धेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्च नोपाधिः बाधानुमितिप्रतिबन्धेतरस्तूपाधिर्भवत्येव वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्निरुष्णत्वग्रहे वह्नितरत्वेनुपाधिः पक्षस्तूपाधिः साध्यव्यापकत्वादिकं सन्दिग्धं गृह्यते स सन्दिग्धोपाधिः पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः कथकसम्प्रदायानुरोधादिति केचित् तन्न निश्चितोपाधिवदनुपाधेः फलं तथाहि अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलके धूमाभावात् आर्द्रेन्धनाभावादिति इत्यत्र साधनव्यापकोपि कश्चिदुपाधिः यथा करका पृथिवी कठिनसंयोगवत्त्वादित्यादौ अनुष्णाशीतस्पर्शवत्त्वं न चात्र स्वहेतुरूपाक्षिप्तेरेव हेत्वन्तरमिति वाच्यं सर्वत्रोपाधेरुद्भावनं न स्यात् कथं तत्र साध्यव्यापकः पक्षाद्गृहीत उपाधिरित्याह शाब्दोपमानयोरिति वैशेषिकाणां मते अनुमानेन्तर्भावः तत्र अनुमाने च प्रमाणा शाब्दोपमानयोरनुमानविधयैव प्रामाण्यं तथाहि इदं वाक्यं मानयोग्यतादिमत्पदस्मारितपदार्थसंसर्गज्ञानपूर्वकानि आकांक्षादिमत्पदकदम्बकत्वात् घटमानयेतिपदकदम्बकवत् पक्षान्तरे पदार्थानामितरसंसर्गवेतः योग्यतादिमत्पदोपस्थापितत्वात् गामानय पदार्थवद् दृष्टान्तेपि दृष्टान्तान्तरेण साध्यसिद्धिरिति तन्न तद्दूषयति तन्नेति सर्वत्र शाब्दस्थले शाब्दबोधस्यानुभाविकत्वान्न हि सर्वत्र शाब्दश्रवणानन्तरं व्याप्तिज्ञानमस्तीति किं च सर्वत्र शाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिरस्त्वेव पदज्ञानं कस्य चिन्न शाब्दबोध एव किं न स्वीक्रियते तत्फलमिति अनुमानं हि त्रिविधं केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकिभेदात् तत्रासत्सपक्षः केवलव्यतिरेकी यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादौ तत्र हि जलादित्रयोदशभेदस्य सर्वमसिद्धत्वेन यानिश्चितत्वाभावतः सपक्षस्याभावः इति सत्सपक्षोन्वयव्यतिरेकी यथा वह्निमान् धूमादित्यादौ सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति तत्र हि व्यतिरेकिनिरूपितव्यतिरेकव्याप्तिज्ञानं कारणं तद्व्यतिरेकव्याप्तिं निरूपयति साध्येति साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः अत्रेदं बोध्यं येन संबन्धेन यद्रूपेण यत्र व्यापकता गृह्यते तत्संबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावज्ञानात् यत्संबन्धेन यत्प्रतिव्यापकता गृह्यते तत्संबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिः इत्यत्र येन तरत्वव्यापकत्वं गन्धस्य गृह्यते तत्र गन्धाभावाभावेन तरत्वात्यन्ताभावः सिद्ध्यति यत्र तु तादात्म्यसंबन्धेनेतरव्यापकता गृह्यते तत्र तादात्म्यसंबन्धेनेतरस्याभावः सिद्ध्यति स एवान्योन्याभावः एवं यत्र संयोगेन धूमवति संयोगसंबन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसंबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावेन धूमस्य तद्धेतुसंयोगसंबन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणं केचित्तु व्यतिरेकसहचारेणान्वयरूपव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिज्ञानं कारणं यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहः स व्यतिरेकीत्युच्यते साध्यप्रसिद्धिस्तु घटादेव जातापद्यान स्वभिन्नत्वावच्छेदेन साध्यत इति वदन्ति अर्थापत्तेरिति अनुमानगतार्थत्वादिति वैशेषिकमतं तन्न समव्याप्तिना व्याप्तिबोधस्याप्यर्थबोधनः द्वैविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् अर्थापत्तेस्तु नैवेह प्रमाणान्तरतेष्यते व्यतिरेकिव्याप्तिबुद्ध्या चरितार्था हि सा यतः अर्थापत्तिः प्रमाणान्तरमिति केचन मन्यन्ते तथाहि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीवनाद्गृहेऽसत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवित्वान्यथानुपपत्त्या बहिः सत्त्वं कल्प्यते तदप्यनुमानेनगतार्थत्वान्नेष्यतेऽर्थापत्तिरिति तथाहि जीवित्वभावेन एव सतो गृहसत्त्वान्तरव्याप्यत्वं गृहीते तत्राश्मतरसिद्धौ तायमानायां गृहेऽसत्त्वबाधाद्बहिःसत्त्वमनुमितौ भासते एवं पीनो देवदत्तो दिवा न भुंक्ते इत्यत्र साध्यस्य पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनं सिध्यते दिवाभोजनबाधे रात्रिभोजनं सिध्यतीति चेदापत्तिप्रमाणान्तरं तस्याः संकेतग्राहकत्वात् निरूपकमत्वेन त्रिव्याप्ति समर्पीलत्वाच्छेदकानभावात् यदिनुव्याप्त्यादिग्रहस्यानुमितिरिति स्त्वं निरूपयतीति स्त्वेति स्त्वं तु जगन्नामेकामधरपमेनदेतु

अधर्मजन्यदुःखस्यातिप्रतिकूलत्वं सचेतसां काम्यमभिलाषविषयः धर्मत्वेति धर्मत्वेनसुखत्वेनकार्यकारणभावइत्यर्थः दुःखं निरूपयति अधर्मेत्यमा संवादिप्रमा
त्वेनदुःखत्वेनकार्यकारणभावइत्यर्थः प्रतिकूलेति सर्वेषांस्वाभाविकंद्वेषविषयइत्यर्थः इच्छां निरूपयति निर्दुःखइति निर्दुःखत्वेसुखेचेच्छाज्ञानं प्रकारकज्ञा
ने इच्छाद्विफलविषयिणीउपायविषयिणीचा फलंतुसुखदुःखाभावश्च नत्फलेच्छांप्रतिफलज्ञानंकारणं अतएवपुरुषार्थःसंभवति यज्ज्ञानंसत्त्वरस्तत्प्रकारकत्वावच्छि
ने इतरेच्छानधीनेच्छाविषयत्वंफलितोर्थः उपायेच्छांप्रति इष्टसाधनताज्ञानंकारणं चिकीर्षेति चिकीर्षाकृतिसाध्यत्वप्रकारेच्छानुयायवेयर्थ्यमःपुत्र
तुःकृतिसाध्येष्टसाधनत्वमतिर्भवेत् कृतिसाध्यत्वप्रकारिकाकृतिसाध्यविषयिणीच्छाचिकीर्षा पाकंस्वकृत्यासाधयामीतिनदनुमानात् चित्तस्यजात
प्रतिकृतिसाध्यताज्ञानमिष्टसाधनताज्ञानंचकारणं अतएवहृष्टाद्यौकृतिसाध्यताज्ञानाभावान्नचिकीर्षा बलवदिष्टेति बलवदिष्टेजनकेति
मतिःस्यात्प्रवृत्तिबंधिका बलवदिष्टसाधनताज्ञानंप्रतिबंधकं बलवद्वेषःप्रतिबंधकइत्यन्ये तदन्यहेतुत्वेति नदहेतुत्वबुद्धेस्तुहेतुत्वंकेचित्सिति
ने बलवदनिष्टजनकत्वज्ञानंकारणमित्यर्थः द्वेषंनिरूपयति द्विष्टसाधनताज्ञानंभवेद्वेषस्यकारणं द्विष्टेति बलवद्विष्टसाधनताज्ञानमात्रेण
नकारणं तेनांतरीयकदुःखजनकेपाकादौनद्वेषः यत्नंनिरूपयति प्रवृत्तिरिति प्रवृत्तिर्निवृत्तिश्चतथाजीवनकारणं एवंप्रयत्नंत्रैविध्यंवयगुरं
१ यत्न तांत्रिकेःप्रचिकीर्षितं प्रवृत्तिर्निवृत्तिर्जीवनयोनिप्रयत्नभेदात् यत्नत्रिविधइत्यर्थः चिकीर्षेति चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा उपादानगे
धानस्यचाध्यक्षंप्रवृत्तौजनकंभवेत् मधुविषसंपृक्तान्नभोजनादौबलवदनिष्टानुबंधित्वेनचिकीर्षाभावान्नप्रवृत्तिरितिभावः कृतिसाध्यतास्य
ज्ञानादिवद्बलवदनिष्टाननुबंधित्वज्ञानमपिस्वतंत्रान्वयव्यतिरेकाभ्यांप्रवृत्तौकारणमित्यपिवदंति कार्यताज्ञानंप्रवर्तकमितिगुरवः तथाहि कारण
ज्ञानस्यप्रवृत्तौजननीयायाचिकीर्षेतिरित्याचैवेतिनमत्सि साचकृतिसाध्यताज्ञानसाध्या इच्छायाःस्वप्रकारकधीसाध्यत्वनियमात्
चिकीर्षाहिकृतिसाध्यत्वप्रकारिकेच्छा नचकृतिसाध्यत्वप्रकारस्यप्रकारकज्ञानंविचिकीर्षायांनद्वाराप्रवृत्तौचहेतुः नत्विष्टसाधनताज्ञानंतत्रहेतुः
कृत्यसाध्येपिप्रवृत्त्यापत्तेः कृत्यसाध्यताज्ञानंप्रतिबंधकमितिचेन्न तदभावापेक्षयाकृतिसाध्यताज्ञानस्यलघुत्वात् नचद्वयोरेवहेतुत्वं गौरवात् ॥
ननुत्वन्मतेमधुविषसंपृक्तान्नभक्षणेचितावंदनेचप्रवृत्त्यापत्तिः कार्यताज्ञानसत्त्वादितिचेन्न स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्यप्रव
र्तकत्वात् काम्यहियागपाकादौकामनावत्त्वविशेषणं ननस्वबलवदनिष्टाननुबंधिकाम्यसाधनताज्ञानेनकार्यताज्ञानं ततःप्रवृत्तिरिति ॥
नमत्स्यभोजनेनप्रवर्त्तते तदानींकामनायाःपुरुषविशेषणत्वाभावात् नित्येचशौचादिकंपुरुषविशेषणं तेनशौचादिज्ञानाधीनकृतिसाध्य
ताज्ञानात्तत्रप्रवृत्तिः ननुतदपेक्षयालाघवेनबलवदनिष्टाननुबंधीष्टसाधनताज्ञानमेवहेतुरस्तु बलवदनिष्टाननुबंधित्वंच दु
खोत्पत्तिनांतरीयकदुःखाधिकदुःखाजनकत्वंबलवद्द्वेषविषयदुःखाजनकत्वंचेतिचेन्न इष्टसाधनत्वकृतिसाधनत्वयोरनुगमत
ज्ञानमशक्यत्वात् साध्यत्वसाधनयोर्विरोधात् असिद्धस्यहिसाध्यत्वंसिद्धस्यचसाधनत्वं नचैकैकस्यैककदासिद्धत्वमसिद्धत्वंचज्ञायते
तस्यात्कालभेदाद्भयंज्ञायतइति मैवं लाघवेनबलवदनिष्टाननुबंधीष्टसाधनत्वेसतिकृतिसाध्यताज्ञानस्यहेतुत्वात् नचसा
ध्यत्वसाधनयोर्विरोधः यदाकदाचित्साध्यत्वसाधनयोरत्वेऽविरोधात् एकदासाध्यत्वसाधनत्वयोस्तुज्ञानात् तर्वीकास्तुसमे
दंकृतिसाध्यमितिज्ञानंनप्रवर्त्तकं अनागतेतस्यज्ञानुमशक्यत्वात् किंत्विदानींपाकःस्वकृतिसाध्यइत्युक्तेतदेतस्यस्याप्रतिसं
धायप्रवर्त्तते तेनादनकामस्यनसाधनताज्ञानवतस्तदुपकरणेवनःपाकःकृतिसाध्यः नादृशाज्ञानमितिप्रतिसंधायपा

केप्रवर्त्तते इत्याहुस्तन्न स्वकलितनलिप्यादौ प्रवृत्तिर्यौवनमदादिप्रवृत्तौ कामः यौवने कामो मदादिना संभोगादौ च तदभावात् इदं तु बोध्यं इदादीमिष्टसाधनत्वा
दिज्ञानं प्रवर्त्तकं तेनाभाविसौवराज्यबालकस्य न प्रवृत्तिः तदानीं कृतिसाध्यत्वाज्ञानात् एवं तृप्तो भोजनेन प्रवर्त्तते तदानीमिष्टसाधनत्वाज्ञानात् प्रवर्त्तते वैरो
पहतोपि न विषादिभक्षणेन तदानीं बलवदनिष्टाननुबन्धित्वज्ञानात् न चास्तिकस्यागम्यागमनपानवधादिप्रवृत्तौ कथं बलवदनिष्टाननुबन्धित्वबुद्धिरने
कसाधनत्वज्ञानादिति वाच्यं उत्कटरागादिना नरकसाधनताधीनिरोधात् दृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा प्रवृत्तिः किं त्विष्टसाधनताज्ञानादिकामात्रं कृतिः।
स्तु प्रवृत्तिरूपा बोध्या तेन जीवनयोनियत्नसाध्यप्राणपञ्चकसञ्चारणप्रवृत्तिः रक्षयं च प्रवर्त्तकत्वात् रोधाहि धेरपि इष्टसाधनत्वादिकमर्थः इत्येतच्च विश्वजिता यजेते
त्यादौ यत्र फलं च श्रूयते तत्रापि स्वर्गफलकस्ते नन्वदृष्टः संध्यामुपासीतेत्यादौ इष्टानुपपत्तेः कामनाभावे च प्रवृत्तिः कथं न चार्थवादिकब्रह्मलोकादिप्रत्ययएवाभा
वो वा फलमिति वाच्यं तथा सति काम्यत्वे नित्यत्वहानापत्तेः कामनाभावे चाकरणापत्तेः इत्थं च फलश्रुतिसत्त्वार्थवत्त्वावमिति चेन्न प्रत्युत ब्रह्मज्ञानादौ नित्यत्वनैमित्तिक
त्वयोरिव नित्यत्वकाम्यत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् न च कामनाभावे कारणापत्तिः त्रिकालस्नानपाठादाविव कामनामन्त्रा वैषम्य वकल्पनात् न चैवं वेदबोधि
तकार्यताज्ञानात्प्रवृत्तिरिति संभवतीति चेन्न स्वेष्टसाधनत्वमविज्ञाय तादृशकार्यताज्ञाने सहस्रेणापि प्रवृत्तेरसंभवात् यद्यपि यमपूर्वफलकत्वमिति तदपि न का
मनाभावे कारणापत्तेः सोत्सात् कामनाकल्पने त्वर्थवादिकफलमेव रात्रिसत्रन्यायात्कल्प्यतामन्यथा प्रवृत्त्यनुपपत्तेः तेनानुवृत्तिः प्रत्यवायस्य तपावान्यम।
स्येते एवं साध्यामुपासते येनु सततं संहितव्रता विधूतपापास्ते यान्ति ब्रह्मलोकमनामयं एवं दयादहरहः श्राद्धमित्यत्र पितीतिमावहन्नित्यादौ प्रीत्यान्यक
मेव फलमस्तु न च पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति वाच्यं गयाश्राद्धादाविवोद्देश्यत्वसंबन्धेनैव फलजनकत्वस्य कल्पकत्वात् अत एवोक्तं पा
त्रादेर्नानफलमनुष्ठातरीत्युत्स्वर्ग इति पितॄणां पुत्रत्वेन स्वस्य स्वर्गादिः फलं यावज्जीवत्वे नैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकत्वात् पं एवीर्यप्रवृ
त्तिश्च न संभवति न हि तत्र सुखदुःखाभावो वा स्वतःपुरुषार्थः नवा तत्साधनं प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेदित्थं यथाहि निर्यन्तृकस्य प्रत्यवायाभावसिद्धिः
तदभावे तदभावः एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति यागेनैव साधारणं कारणतया दुःखप्रागभावसत्वापि सुस्थत्वादेवम
प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति ननु नकलिङ्गभक्षयेदित्यत्र विध्यर्थमन्वयं न जर्थः किंतु बलवदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बो
ध्यते अन्यथा बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वविध्यर्थः तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेषणाभावे विश्राम्यति
ननु श्येनेनाभिचरन्यजेतेत्यत्र कथं बलवदनिष्टाननुबन्धित्वविध्यर्थः श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात् न चैवं धत्वात्रति घ
पहतिवाच्यं अभिचारे प्रायश्चित्तोपदेशात् न च मरणानुकूलव्यापारमात्रं यदि तिस्या तदा तत्र कारस्य हिंसात्वापत्तिः गलग्रीलग्रीतृभक्षणजन्यमरणा
आत्मवधस्यापत्तिश्रुति वाच्यं मरणोद्देश्यकत्वस्यापि विशेषणत्वात् अन्योद्देश्यकहिंसनाराच्च हतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न श्येनवारण
याद्दृष्टाद्वारत्वेन विशेषणत्वात् अत एव काशीमरणार्थं कृतेनाशिवपूजादेरपि न हिंसात्व न च साक्षान्मरणोजनकस्यैव हिंसात्वं श्येनस्तु न तथा किंतु जन्याद्द
र्धमिति वाच्यं खड्गपातेन व्रणोपरं परेयाम्ने तेहिंसानापत्तेः केचित्तु श्येनस्य हिंसाफलं न तु मरणं तेन श्येनजन्यादृष्टखड्गपातादिरूपा हिंसाऽभिचारपदार्थस्तस्य
च पापजनकत्वमतः श्येनस्य वैधत्वात् पापजनकत्वेप्यग्रिमपापं प्रतिसंधाय सेतानप्रवर्त्तते अतो चाधीस्ते आज्ञाभिप्रायो विध्यर्थः पाकं कुर्यादित्या
दौ आज्ञातादपेक्षाचित्वलिङ्गमात्रस्य इच्छावाचित्वलाघवादेवं च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामकृतिसाध्यतया आप्तेष्टसाध्यत्वार्थः आप्ते इष्ट
त्वमेवेष्टसाधनत्वादिकमनुमाय प्रवर्त्तते कलिङ्गभक्षणे तदभावान्न प्रवर्त्तते यत्तु वेदपौरुषेयत्वं नाभ्युपैति तं प्रतिविधिरेव तावद्धर्म इव श्रुतिर्नु
र्गीयाः प्रयोगमानं न च कर्तृस्मरणं बाधकं कपिलकणादादिकसारम्भाद्युपर्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात् अन्यथास्मृतेः पाकर्तृत्वापत्तेः
तत्र कर्तृस्मरणमस्तीति चेत् वेदपिच्छो दक्षिजज्ञिरे तस्मादित्यादिकर्तृस्मरणमस्त्येव एवं प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते इति च इष्टं
वा स्वयंभूतेप्रभगवान्वेदागीतस्त्वया पुरा शिवाद्यास्तविपर्यताः स्मर्त्तारोस्य न कारकोऽतिवेदस्य स्तुतिमात्रं न च पौरुषेयत्वे प्रमादिसंभवाद

प्रामाण्यं स्यादिति वाच्यं नित्यसर्वज्ञत्वेन निर्दोषात् अत एव गुरुणान्तरस्य भ्रमादिसंभवात् कपिलादेः कर्तृत्वे वेदस्य किंच वर्णानामेव नित्यत्वस्यैवस्यमाण। त्वात् नन्वश्रेहस्य सततरा वेदस्यापि अनित्यत्वमित्युपादानस्य समवायिकारणस्य प्रत्यक्षप्रवृत्तौ कारणमिति निवृत्तिरिति निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् द्विष्टसाधनताज्ञानस्य निवृत्तिप्रतिजनकत्वं अन्वयव्यतिरेकाभ्यामवधार्यत इति भावः यत्न इति जीवनयोनियत्नो यावज्जीवनमनुवर्तते स चातीन्द्रियस्तत्र प्रमाणमाह शारीर इति शरीरे प्राणसंचारकारणं तत्प्रकीर्तितं प्राणसंचारो ह्यधःश्वासादि यत्नसाध्यः इत्थं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षयत्नेबाधाद्वातीन्द्रिययत्नसिद्धिः स एव च जीवनयोनियत्नः गुरुत्वं निरूपयति अतीन्द्रियमिति अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तत् अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं तदेवासमवायी। स्यात् पतनाख्येतु कर्मणि अनित्य द्व्यणुकादौ तद्गुरुत्वमनित्यं नित्यपरमाणौ नित्यं गुरुत्वमित्यनुवर्तते तद्गुरुत्वमसमवायिकारणं द्रवत्वं निरूपयति सांसिद्धिकमिति सांसिद्धिके द्रवत्वं स्यान्नैमित्तिकमथापरं सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः परमाणौ जले नित्यमन्यत्रानित्यमुच्यते नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेत्यर्थः परमाणाविति जलपरमाणौ द्रवत्वं नित्यं अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यं क्वचित्तेजसि

प्रकृति पृथिव्यां नैमित्तिके द्रवत्वे कोवा नैमित्तिकार्थस्तं दर्शयति नैमित्तिकमिति अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वं न च सुवर्णादिद्रूपे तेजसि घृतजतुपृथिव्यां च वर्तते इत्यर्थः हेतुरिति असमवायिकारणमित्यर्थः संग्रहे सक्तुकादिसंयोगविशेषे तु द्रवत्वं स्नेहसहितमिति बोध्यं तेनेदं न सवल्गोदिनानसंग्रहः स्नेहं निरूपयति स्नेह इति जल इति जल एवेत्यर्थः सस्नेहः नन्वपृथिव्यामपि तैलस्नेह उपलभ्यते न चासौ जलीयः तथा सति दहनप्रतिकूलत्वप्रसंगादत आह तैलान्तर इति तैलान्तरेऽप्युत्कर्षाद्दहनं स्यानुकूलता तत्प्रकर्षात् तैले उपलभ्यमानस्नेहोऽपि जलीय एव तस्य प्रकृष्टत्वाद्दहनानुकूलं अप्रकृष्टस्नेहं जलं वह्निं विनाशयतीति भावः संस्कारभेदं निरूपयति संस्कारभेद इति संस्कारभेदो वेगोऽन्यस्थितिस्थापकभावने मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि अतीन्द्रियं तद्विज्ञेयं क्वचित्स्पन्देऽपि कारणं वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः कर्मज इति वेगो द्विविध इत्यर्थः संस्कारादौ हि नोदनजनिते तन्नकर्मणो वेगो जन्यते तेन पूर्वकर्मनाशस्ततउत्तरकर्म एवमग्रेऽपि च वेगं विना कर्मणः कर्मप्रतिबन्धकत्वात्पूर्वकर्मनाशे उत्तरकर्मोत्पत्तिश्च न स्यात् यत्र च वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः स्थितिस्थापकेति आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् केचिदिति चतुर्ष्वपि क्षित्यादिषु स्थितिस्थापकं वेत्यन्ये तेन तदभावप्रमाणमिति भावः तेऽस्थितिस्थापकं क्वचिदाकृष्टशाखादौ भावनाख्य इति तस्य संस्कारस्य उपेक्षात्मकज्ञानात् संस्काराभुत्पत्तेरुपेक्षानात्मकं ज्ञानं तु विषयात्र तस्य निश्चयइत्युक्तं तेनोपेक्षात्मनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः ननु स्मरणं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वे तेनोपेक्षादिस्थलेन स्मरणं इत्थं च संस्कारं प्रति ज्ञानत्वेन हेतुतास्तु इति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किंच उपेक्षास्थलेऽपि संस्कारकल्पनाया गुरुत्वात् संस्कारं प्रति उपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात् तत्र प्रमाणं दर्शयति अतीन्द्रियं न विज्ञेयं क्वचित्स्मरणेऽपि कारणं भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते असौ संस्कारः स्मरण इति यतः स्मरणप्रत्यभिज्ञां नैव जनयति अतः संस्कारस्य विनो

17

व्यापारं कर्तुमेव संस्कारणादिजननासामर्थ्यात् स च व्यापारान्तराभावे कारणत्वासंभवात् न च प्रत्यभिज्ञांशतिनतरसंस्कारसहेतुत्वेन प्रत्यभिज्ञायाः सं
स्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यं अप्रयोजकत्वात् परे तु अनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयात् उद्बुद्धसंस्कारसहेतुत्वापेक्षया न तत्र स्मरणमेव
प्रत्यभिज्ञानं प्रति हेतुत्वं कल्प्यत इत्याहुः अदृष्टं निरूपयति धर्मो विति स्वर्गादीनि स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च
साधनं धर्म इत्यर्थः तत्र प्रमाणं दर्शयितुमाह यागादीति यागादिव्यापारतया हि धर्मः कल्प्यते अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च
कालान्तरभाविस्वर्गजनकत्वं न स्यात् तदुक्तमाचार्यैः चिरध्वस्तं फलायालं न कर्मातिशयं विनेति ननु यागध्वंस एव व्यापारः स्यात् न च प्रतियोगि
ध्वंसयोरेकजनकत्वं सर्वत्र तथात्वे मानाभावात् अत आह गंगास्नानादीनि गंगास्नानस्य स्वर्गजनकत्वे तन्नानाजलसंयोगध्वंसानां व्यापार
त्वमपेक्ष्यैकमेवापूर्वं कल्प्यते लाघवादिति भावः नन्वध्वंसोपि न व्यापारोस्तु न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यं अन्यथा
सिद्धनियतपूर्ववर्त्तित्वस्य तत्रापि सत्त्वात् अव्यवहितपूर्ववृत्तित्वं हि चक्षुःसंयोगादेः कारणत्वं ननु सर्वत्र कालकार्यं वर्त्तित्वमिव समवायिकारणस्य का
रणत्वं इत्यत आह कर्मनाशेति यदि हि चस्यान्तरा कर्मनाशानलस्पर्शादिना नाशयत्वं ध्वंसस्य नाहं तेन यागादेर्नाशः प्रतिबंधो वा वक्तुं शक्य
ते वक्तुं शक्यते तस्य पूर्वमेव नष्टत्वादिति नरकादीनामिति नरकेदुःखादिसकलदुःखानां नारकिशरीरादीनां साधनमधर्म इत्यर्थः प्रमा
णमाह प्रायश्चित्तादिनाश्यत इति यदि ह्यधर्मो न स्यात्तदा प्रायश्चित्तादिनाश्यत्वं न स्यात् न हि तेन ब्रह्महननादेर्नाशः प्रतिबंधो वा वि
धातुं शक्यते तस्य पूर्वं विनष्टत्वादिति भावः जीवेति ईश्वरस्य धर्माधर्माभावादिति भावः इमौ धर्माधर्मौ वासनेति अनागतानिनां कृतेऽ
पि सुकृतदुःकृते कर्मणी न फलायेति भावः ज्ञानादपीत्यपि ना भोगपरिग्रहः ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वमनागतानुक्षीय
ते कर्मकल्पकोटिशतैरपीति वचनविरोधात् इत्थं च तत्त्वज्ञानिनोऽकृतितिकायव्यूहेन सकलकर्मनाशः तदुक्तं ज्ञानाग्निः सर्वकर्माणि भ
स्मसात्कुरुते तथेति क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादि च न स्यात्।
ज्ञानेन सर्वेषां कर्मणां नाशादिति चेन्न प्रारब्धेतरकर्मणामेव नाशात् तच्छरीरभोगजनकं हि यत्कर्म प्रारब्धं तदभिप्रायमेव नाभुक्तमिति
वचनमिति शब्दं निरूपयति शब्द इति नभोवृत्तिः आकाशसमवेतः हरस्य शब्दग्रहणादाह श्रोत्रेति ननु मृदंगाद्यवच्छेदेनोत्पन्नः शब्दः
कथं श्रोत्रे कथं तदुत्पन्नकर्मणा भोगजनकत्वं इति चेन्न तत्र भोगस्य वेदबोधितनाशकापलत्वेन तत्वा कथमन्यथा प्रायश्चित्तादिना पापक्षयः।
आह वीचीति अयं शब्दस्य बहिर्देशनादिगवच्छेदेनान्यः शब्दस्तेनैव शब्देनान्यः ततेऽसनाद्यः शब्दव्यापकः एवं क्रमेण श्रोत्रोत्पन्नः उपर
भवत इति कदंबेति आदिपदात् इत्यादिना तदा शब्दा उत्पद्यन्ते तैश्चान्यैः शब्दा उत्पाद्यन्त इति भावः अस्मिन्कल्पे गोलकादिकं क्वचिन्न तु इ
ति ननु शब्दस्य नित्यत्वादुत्पत्तिकथनमसंगतमत आह उत्पन्न इति शब्दानामुत्पादविनाशप्रत्ययगोचरत्वादनित्यत्वमित्यर्थः
ननु स एवायं ककार इत्यादि प्रत्यभिज्ञानात् शब्दानां नित्यत्वं इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपैवेत्यत आह सोयमिति सजातीयमि
ति तथा हि प्रत्यभिज्ञानस्य तत्सजातीयत्वविषयो न तु तद्व्यक्त्यभेदो विषयः उत्पन्नविनष्टविरोधात् इत्थं च द्वयोरपि बुद्ध्योर्न भ्रमत्वं।
मिति ननु सजातीयः सोयमिति प्रत्यभिज्ञा [illegible] धर्मत्वे नापि कृतमित्यादि दर्शनादिति

पत्रे १६